तत्र क्षेपे द्वादशाहं भ्रंशे कृच्छ्रं समाचरेत् ॥

द्रव्यभेदे महाहानिः कर्तृभेदस्त्वनर्थदः ।
स्थानभेदे महादोषस्त्रिभेदं नैव कारयेत् ॥

उत्तरीयशिलापात्रकर्तृद्रव्यविपर्यये ।
पूर्वदत्तांजलीन् पिण्डान् पुनरित्याह गौतमः ॥

देवादीनां नवश्राद्धं अतीतं प्रथमेह्नि ।
तृतीयेह्नि कर्तव्यं अन्येषामप्ययं विधिः ॥

अथ सञ्चयनविधिरुच्यते ॥

प्रथमेह्नि द्वितीयेह्नि तृतीये नवसप्तमे ।
अस्थिसञ्चयनं कुर्याद्दिने तद्गोत्रजैस्सह ॥

अथ वर्जनीयकालः ॥

भौमार्कमन्दवारेषु तिथियुग्मेषु वर्जयेत् ।
प्रदातुर्जन्मनक्षत्रं त्रिपदर्क्षं विशेषतः ॥

नन्दायां भार्गवदिने चतुर्दश्यां त्रिजन्मनि ।
नास्थिसञ्चयनं कार्यं कुलक्षयकरम्भवेत् ॥

बृहस्पतौ तथा सार्पे पुष्यहस्ते तथैव च ।
भृग्वङ्गारकयोश्चैव वर्जयेदस्थिसंचयम् ॥

कर्तुश्चन्द्राष्टमे वापि न कार्यं फल्गुनीद्वयम् ।
प्रोष्ठपदाद्वयाषाढाद्वयान्यनक्षत्रेषु च ॥

सञ्चयनगृह्यपरिशिष्टेपि षष्ठाष्टमदशाहवर्जमनेकनक्षत्र इति ॥

अथ सञ्चयनप्रयोगः उच्यते

अपरेद्युः तृतीयस्यां पञ्चम्यां सप्तम्यां वा नवम्यां वा कर्ता ज्ञातिमित्रबान्धवैस्सह पञ्चगव्यं क्षीरं शमीशाखाम लक्षणकुम्भं पिधानकलशं शूर्पं खनित्रं बल्यर्थान्नमदिलाजान् गन्धाक्षत पुष्पाण्युदकुम्भं तिलान् तैलं दर्भांश्च गृहीत्वा दहनदेशं गत्वा तत्सर्वं शुचौ देशे निधाय स्नात्वाचम्य। समस्तसंपत् + गोविन्दाय नमो नमः। प्राचीनावीती पर्षदं प्रणम्य दक्षिणां गृहीत्वा अस्मत्-पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिनादारभ्य अद्य द्वितीयेहनि अस्थिसञ्चयनं कर्तुं योग्यतासिद्धिमनुगृहाण। योग्यतासिद्धिरस्त्विति ब्राह्मणाः प्रतिब्रूयुः। अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य+द्वितीयेहनि अस्थिसञ्चयनं कर्तुं मुख्यकालो भूत्वा मम अधिकार-सम्पदस्त्विति भवन्तो ब्रुवन्तु। अधिकारसंपदस्तु। कालश्च मुख्यकालोस्त्विति भवन्तो ब्रुवन्तु कालश्च मुख्यकालोस्तु सव्यं ओं ओं अद्य पूर्वोक्तएवंगुणविशेषणविशिष्टायां पुण्यतिथौ प्राचीनावीती (अस्मत्) पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिनादारभ्य अद्य द्वितीयेहनि (अस्मत्) पितुः अक्षय्यपुण्यलोकावाप्त्यर्थं अस्थिसंचयनं करिष्ये इति सङ्कल्प्य। तत्काले कृच्छ्राचरणं करिष्य इति सङ्कल्प्य। हिरण्यगर्भ + प्रयच्छ मे अस्थिसञ्चयनकाले तिथिवारनक्षत्रयोगकरणैः यो दोषस्समजनि तद्दोषपरिहारार्थं प्राजापत्यकृच्छ्रप्रत्याम्नायं यथाशक्ति हिरण्यं महाविष्णुप्रीतिं कामयमानस्तुभ्यमहं संप्रददे ॥

सव्यं ओं ओं अद्य पूर्वोक्तएवंगुणविशिष्टायां पुण्यतिथौ प्राचीनावीती अस्मत्पितुः+अहनि शवानलचण्डालपतितकाकगृध्रश्वादिस्पर्शदोषपरिहारार्थं पञ्चगव्यमेळनं प्रोक्षणं च करिष्य इति सङ्कल्प्य। गायत्र्या गोमूत्रं। आप्यायस्वेति क्षीरं। दधिक्राविण्ण इति दधि। शुक्रमसि ज्योतिरसीत्याज्यं। देवस्य त्वेतिकूर्चेन शुद्धोदकं ओमिति प्रणवेनालोड्य तत्तन्मन्त्रेण प्रोक्ष्य शीतकेशीतिकावतु ह्लादिके ह्लादुकावेतु। मण्डूक्या उं सुसंगमय। इमं त्वा अग्निर्हर्षय पादादिशिरःपर्यन्तः प्रोक्ष्य अयुग्मकुम्भै-रुदकैः अग्निं शमयित्वा। अङ्गुष्ठयोः ऊर्णासूत्रेण बृहतीफले बध्वा। दक्षिणाभिमुखो भूत्वा वामहस्तेन कुम्भं स्पृष्ट्वा (शिरःप्रदेशास्थिमादाय निश्शब्दं कुम्भे निक्षिप्य) पादपूर्वकं शिरोन्तमन्वीक्षमाणा निश्शब्दं कुम्भे निदधाति। अङ्गुष्ठोपकानिष्ठिकाभ्यां इदं त एकं पर ऊत एकं। तृतीयेन ज्योतिषा संविशस्व। संवेशने तन्वे१श्चारुरेधि प्रियो देवानां परमजेनित्वे इति मन्त्रेण गृहीत्वा निश्शब्दं कुम्भे दद्युः। स्त्रीणां वामलक्षणे कुम्भे भस्म संशोध्य सूक्ष्मास्थीनि कुम्भे निधाय-तत्सव्यदेशे गर्तं खनित्वा गायत्र्या प्रोक्ष्य तिलान्विकीर्य ॥

उपसर्प मातरमिति चतसृणां संकुशिकः पितृमेधस्त्रिष्टुप् द्वितीया प्रस्तारा पंक्तिः तृतीया त्रिष्टुप् चतुर्थी जगती अस्थिकुम्भस्योपरि (मृत्तिकानिक्षेपणे) मृत्प्रक्षेपणे विनियोगः। उपसर्प

मातरं + सादनाते मिनोतु । यावदस्थि न हीयते तद्दहनदेशे मृदा पुरुषाकृतिं कृत्वा आग्नेय-शिरोभागान्तं कृत्वा । अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिना-दारभ्य अद्य द्वितीयेहनि (स्मशानवेदिकापूजां करिष्य इति संकल्प्य) अस्थिसञ्चयनांगवेदिका-राधनबलिप्रदानपिण्डप्रदानानि करिष्य इति संकल्प्य तच्छिरोभागे प्राङ्मुखं आग्नेयापवर्गं निधाय दक्षिणामुखमुपविश्य मध्ये प्रेतराजाय अभ्यञ्जनमुपतिष्ठतु । उत्तरतः प्रेतसखिरुद्राय अभ्यञ्जन-मुपतिष्ठतु । दक्षिणतः प्रेतसखियमाय अभ्यञ्जनमुपतिष्ठतु । मध्ये प्रेतराजाय उत्तरतो रुद्राय दक्षिणतो यमाय स्नानमुपतिष्ठतु । अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्त्यर्थं उत्तमलोका-वाप्त्यर्थं मरणदिनादारभ्य अद्य द्वितीयेहनि संचयनाङ्गवेदिकाराधनश्राद्धे मध्ये प्रेतराजाय अयं ते क्षणः उपतिष्ठतु । उत्तरतो रुद्राय अयं ते क्षणः उपतिष्ठतु । दक्षिणतो यमायायं ते क्षणः उपतिष्ठतु । अस्मत्पितः गोत्र शर्मन् प्रेत + श्राद्धे प्रेतराजाय पाद्यमुपतिष्ठतु । उत्तरतो रुद्राय पाद्य-मुपतिष्ठतु । दक्षिणतो यमाय पाद्यमुपतिष्ठतु ॥

सव्यं ओं ओं अद्य पूर्वोक्तएवंगुणविशिष्टायां पुण्यतिथौ प्राचीनावीती अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य + अस्थिसञ्चयनाङ्गवेदिकाराधनश्राद्धे भवदनुज्ञया प्रक्रान्तं श्राद्धकर्म करिष्ये इति संकल्प्य अपहता + गतं मनः इति मन्त्रेण तिलान्विकीर्य त्रिकोणमण्डलं कृत्वा ॥

उदीर्तामवर उत्पर उन्मध्यमः प्रेत सौम्य ।
असुं य इयायावृकाऋतज्ञ स नोवतु प्रेतो हवे ॥

सव्यं आमं गायत्र्या प्रोक्ष्य । प्राचीनावीती अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य + श्राद्धे मध्ये प्रेतराजाय इदं ते आसनमुपतिष्ठतु अयं ते क्षण उपतिष्ठतु । उत्तरतो रुद्राय आसन-मुपतिष्ठतु । अयं ते क्षणः उपतिष्ठतु । दक्षिणतो यमाय आसनमुपतिष्ठतु अयं ते क्षणः उपतिष्ठतु । एकदर्भं भूमौ निधाय तदुपरि पत्रपुटं अधोबिलं निक्षिप्य प्रोक्ष्य उत्तानं कृत्वा प्रोक्ष्य तिलाः उपतिष्ठन्तु उदकं पूरयित्वा शं नो देवीरभिष्टय आपो भवन्तु पीतये शम्योरभिस्रवन्तु नः । तिलोसि सोमदेवत्यः गोसवे देवनिर्मितः । प्रत्नवद्भिः प्रत्त एहि । अस्मत्पितः गोत्र शर्मन् प्रेत+ वेदिकाराधनश्राद्धे मध्ये प्रेतराजायार्घ्यमुपतिष्ठतु । उत्तरतो रुद्रायार्घ्यमुपतिष्ठतु । दक्षिणतो यमायार्घ्यमुपतिष्ठतु इत्यर्घ्यं शिलासु दत्वा पत्रपुटं छित्वा पृष्ठतो विसृजेत् । मध्ये प्रेतराजाय कंटकोच्छिष्टनिवारणार्थं अपूपपादुके उपतिष्ठेतां मध्ये प्रेतराजाय लज्जानिवारणार्थं वस्त्रमुपतिष्ठतु उत्तरतो रुद्राय + उपतिष्ठतु दक्षिणतो यमाय लज्जानिवारणार्थं वस्त्रमुपतिष्ठतु मध्ये प्रेतराजाय महावायुनिर्हरणार्थं ध्वजपताके उपतिष्ठेतां उत्तरतो रुद्राय दक्षिणतो यमाय महावायुनिर्हरणार्थं

ध्वजपताके उपतिष्ठेताम् । मध्ये प्रेतराजाय सर्वोपचारार्थे सतिलदर्भपत्रमुपतिष्ठतु । उत्तरतो रुद्राय + उपतिष्ठतु । दक्षिणतो यमाय + उपतिष्ठतु ॥

ओं अद्य पूर्वोक्त + श्राद्धे अस्मत्पितरं गोत्रं शर्माणं प्रेतमुद्दिश्य मया कृतेन मरणदिनादारभ्य द्वितीयेहनि वेदिकाराधनश्राद्धेन अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्तिद्वारा प्रेततृप्त्यर्थमुपतिष्ठतु इति तिलोदकं भूमौ विसृजेत् । सव्यं ओं ओं अद्यपूर्वोक्त + द्वितीयेहनि वेदिकाराधनश्राद्धे तिलोदकपिंडप्रदानं करिष्य इति संकल्प्य पिंडस्थाने दर्भासनमुपतिष्ठतु । तदुपरि एतानि तिलोदकान्युपतिष्ठन्तु । अस्मत्पित्रे गोत्राय शर्मणे प्रेताय प्रेततृप्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिनादारभ्य अद्य द्वितीयेहनि अस्थिसंचयनाङ्गवेदिकाराधनश्राद्धे मध्ये प्रेतराजाय एष पिंडः उपतिष्ठतु उत्तरतो रुद्राय एव पिंड उपतिष्ठतु । दक्षिणतो यमाय एव पिंड उपतिष्ठतु । पिंडानामुपरि एतानि तिलोदकान्युपतिष्ठन्तु । अञ्जनाभ्यञ्जने उपतिष्ठेतां । भोगनिष्पत्त्यर्थं ताम्बूलमुपतिष्ठतु । वीर्यनिष्पत्त्यर्थं दक्षिणाः उपतिष्ठन्तु ॥

सव्यं ओं ओं अद्य पूर्वोक्तएवंगुणविशेषविशिष्टायां पुण्यतिथौ प्राचीनावीती अस्मत्पितुः + द्वितीयेहनि वेदिकाराधनश्राद्धे अस्मत्पितरं गोत्रं शर्माणं प्रेतमुद्दिश्य मयाकृतैः मरणदिनादारभ्य द्वितीयेहनि वेदिकाराधनश्राद्धतिलोदकपिंडप्रदानैश्च गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्तिद्वारा प्रेततृप्त्यर्थमुपतिष्ठतु सव्यं वंशाभिवृध्यर्थं लाजाः उपतिष्ठंतु (सर्वतो लाजान्प्रकीर्य) बलिं गायत्र्या प्रोक्ष्य ओं भूर्भुवस्सुवः प्राचीनावीती अपदक्षिणं परिषिच्य हस्तोदकं शिलासु दत्वा । पृथिवी ते पात्रं श्रीविष्णो बलिं रक्ष पितः गोत्र शर्मन्प्रेत एतत्ते बलिं सपरिकरं प्रेतो देवता इमं बलिं सोपस्करं सव्यञ्जनं सपरिकरं सदक्षिणाकं सतांबूलं सतिलापिधानउदकुम्भनालिकेरसलिलसहितं अस्मत्पित्रे गोत्राय शर्मणे प्रेताय प्रेततृप्त्यर्थमुत्तमलोकावाप्त्यर्थं मरणदिनादारभ्य द्वितीयेहनि इमं बलिं प्रेततृप्तिद्वारा प्रेततृप्त्यर्थमुपतिष्ठत्विति सतिलदर्भं गृहीत्वा जलं निक्षिप्य भूमौ विसृजेत् । सव्यं कृत्वा ॥

नारायण नमस्तेस्तु शङ्खचक्रगदाधर ।
अक्षय्यं बलिदानेन प्रेततृप्तिकरो भव ॥

इति प्रार्थयेत् । नालिकेरसलिलं शिलासु दत्वा दहनजनिततापोपशमनार्थे नालिकेरसलिलमुपतिष्ठत्विति वदेत् । जले पिंडान् निक्षिपेत् ॥

अस्थिकुम्भमादाय नदीतीरं गत्वा भूमौ संस्थाप्य समस्तसम्पदिति (प्रणम्य) नमस्कृत्य । प्राचीनावीती अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य + अद्य द्वितीयेहनि अस्मत्पितुः अक्षय्य-

पुण्यलोकावाप्त्यर्थं कावेर्यंभसि अस्थिनिक्षेपणं कर्तुं योग्यतासिद्धिमनुगृहाण योग्यतासिद्धिरस्त्विति ब्राह्मणाः प्रतिब्रूयुः मुख्यकालो भूत्वा मम अधिकारसंपदस्त्विति भवन्तो ब्रुवन्तु । अधिकार-संपदस्त्विति ब्राह्मणाः प्रतिब्रूयुः । कालश्च मुख्यकालोऽस्त्विति भवन्तो ब्रुवन्तु कालश्च मुख्य-कालोऽस्त्विति ब्राह्मणा ब्रूयुः । ओं ओं अद्य पूर्वोक्तएवंगुणविशिष्टायां पुण्यतिथौ प्राचीनावीती अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य+द्वितीयेऽहनि अस्मत्पितुः अक्षय्यपुण्यलोकावाप्त्यर्थं कावेर्यंभसि अस्थिनिक्षेपणं करिष्य इति संकल्प्य । तत्काले कृच्छ्राचरणं करिष्य इति संकल्प्य हिरण्य+प्रयच्छ मे अस्थिनिक्षेपणकाले तिथिवारनक्षत्रलग्नयोगकरणैः यो दोषस्समजनि तद्दोषपरिहारार्थं प्राजापत्य-कृच्छ्रप्रत्याम्नायं यथाशक्ति हिरण्यं महाविष्णुप्रीतिं कामयमानस्तुभ्यमहं संप्रददे इति ब्राह्मणाय दद्यात् । अस्थिनिक्षेपणकाले गोमूल्यदानं करिष्य इति संकल्प्य —

गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश ।
तस्मादस्याः प्रदानेनातश्शान्तिं प्रयच्छ मे ॥

इदं गोमूल्यं सदक्षिणाकं सताम्बूलं अस्थिनिक्षेपणकाले महाविष्णुप्रीतिं कामयमानस्तुभ्यमहं संप्रददे ः अस्थिनिक्षेपणकाले दशदानानि करिष्य इति संकल्प्य ॥

गोभूतिलहिरण्याज्यवासोधान्यगुळानि च ।
रौप्यं लवणमित्याहुर्दशदानान्यनुक्रमात् ॥

इति दशदानप्रत्याम्नायं यथाशक्ति हिरण्यं महाविष्णुप्रीतिं कामयमानस्तुभ्यमहं संप्रददे इति ब्राह्मणाय दद्यात् । अस्थीनि केशवादिनामभिः द्वादशवारं मज्जयित्वा अस्थिदेवताभ्यः आसनं समर्पयामि स्नानकाले पुरुषसूक्तेनाभिषिच्य विधिवन्मिळितेन पञ्चगव्येन (क्षीरं निवेदनं कृत्वा) मृदा शरावं (मृत्पिण्डं) कृत्वा तत्र दक्षिणाग्रान्दर्भानास्तीर्य तिलानवकीर्यास्थि निधाय हिरण्यरूपस्सहिरण्य-संदृगपन्नपात् सेदुहिरण्यवर्णः । हिरण्ययात्परियोनेर्निषद्याहिरण्यदा ददत्यन्नमस्मै इति हिरण्य-शकलन्निधाय मधु वाता ऋतायते । मधु क्षरन्ति सिंधवः । माध्वीर्नस्संत्वोषधीः मधुनक्तमुतोषसो मधुमत्पार्थिवं रजः मधु द्यौरस्तु नः पिता । मधुमान्नो वनस्पतिर्मधुमां अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः । मधुस्नानम् । घृतं मिमिक्षिरे घृतमस्य योनिर्घृते श्रितो घृतमवस्य धाम । अनुष्वधमावह मादस्व स्वाहाकृतं वृषभवक्षिहव्यं घृतेन स्नात्वा । स्वादुः पवस्वदिव्याय जन्मने स्वादुरिन्द्राय सुहवीतु नाम्ने । स्वादुर्मित्राय वरुणाय वायवे बृहस्पतये मधुमाँ अदाभ्यः । आप्यायस्व समेतु ते विश्वतस्सोमवृष्ण्यं भवावाजस्य संगथे क्षीरेण स्नाप्य देवस्य त्वा सवितुः प्रसवे । अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां इति कुशोदकं तिलोसीति तिलान्निक्षिप्य शरावान्तरेणास्थीन्यपिधाय अस्थीनि गृहीत्वा नाभिप्रमाणजलं प्रविश्य ॥

पदोपस्थितानामेव तेषामन्वयबोधकत्वमिति नियमो यतः। अशाब्दत्वश्चेत्थम्–वाक्यार्थस्यार्थगम्यत्वे शब्दावगम्यत्वाभावात्, प्रथमोपस्थितपदान्यतिक्रम्यार्थस्य प्रमाणत्वे व्यवधानश्चेति।

अत्राहुराचार्यपादीयाः —

न तावत् स्फोटमतं युक्तम्, तत्सद्भावे प्रमाणाभावात्। न चोक्तं प्रमाणम्, क्लृप्तवर्णपद-विषयकत्वेनोपपत्तेः तद्बुद्धेः। न चानेकेष्वेकमिति बुद्ध्यनुपपत्तिः; अनेकेषु वृक्षेष्वेकं वनमिति बुद्ध्यभावापत्तेः। यद्येकदेशस्थत्वोपाधिना सेष्यते, तर्ह्येकार्थावच्छेदोपाधिना एषापीष्यताम्। वाक्यस्य गामानयेत्यादिभागोपलब्धेरखण्डत्वमप्यनुपपन्नम्।

नापि योगाचारमतं युक्तम् बाधितत्वलक्षणोपाधिदूषितत्वादुक्तानुमानस्य प्रपञ्चविज्ञा-नात्मकत्वासिद्धेः। बहिरन्तर्भानाभ्यां ज्ञानज्ञेययोर्भेदसिद्धेश्च। ज्ञानस्य ज्ञेयात्मकत्वे स्वयमेव स्वयं गृह्णातीत्यापत्त्या आत्माश्रयापत्तेः।

नापि गुरुमतं युक्तम्; अन्वितार्थे शक्तिग्रहासंभवात्। बालो हि प्रयोज्यवृद्धस्यान्वित-ज्ञानमनुमाय तच्छक्तिं पदेषु गृह्णीयात्, अनुमानमेव तु न संभवति। व्यवहारत्वमात्रस्य तन्मतरीत्या भेदाग्रहसाध्ये शुक्तिरजतव्यवहारे व्यभिचारेणालिङ्गत्वात्। सेयं दीपज्वालेत्याद्यबाधितव्यवहारे भेदाग्रह-मात्रसाध्ये अबाध्यत्वविशिष्टस्यापि तस्य व्यभिचारेणालिङ्गत्वात्। ननु केनाप्यबाधितत्वविशिष्टं व्यवहारत्वं यौक्तिकबाधात् ज्वालैकत्वव्यवहारे नास्ति, अन्वितज्ञानानुमानं संभवतीति चेत्; एवमपि अन्वितशक्तिः पदेषु न संभवति। घटमानयेति वाक्यप्रयोगानन्तरं, "अयं साकांक्षयोग्य-सन्निहितार्थान्तरान्वितघटविवक्षावान् आप्तत्वे सति घटपदप्रयोक्तृत्वात् संमतवत्"। "तद्विवक्षा च तादृशार्थज्ञानपूर्विका, आप्तविवक्षात्वात्" "ज्ञानं च तादृशार्थाव्यभिचारि आप्तज्ञानत्वात्" इति विवक्षाज्ञानार्थानुमानपरंपरया प्रयोज्यवृद्धस्यान्वितज्ञानोदयेऽनभ्यस्तस्याजातत्वात्। अन्यस्य अन्योत्पन्नज्ञानजननसामर्थ्येऽतिप्रसङ्गात्। नन्वेतद्गुरुमतानधिगतिविजृम्भितम्:— वाक्यं हि द्विविधं, पौरुषेयमपौरुषेयञ्चेति। तत्रापौरुषेयवेदस्याप्रामाण्यशंकाभावेन तन्निरासकमानान्तरा-पेक्षाभावेऽपि, पौरुषेयवाक्यजन्यज्ञाने उक्तानुमानपरंपरयाऽप्रामाण्यशङ्कानिरासमात्रम्, न ततो-ऽन्वितज्ञानोदयः इत्यङ्गीकरणादिति चेत्; एवमपि, "कोऽसौ गच्छति? राजाऽसौ गच्छति" इत्यादिसिद्धार्थकवाक्येषु अन्वितज्ञानं न संभवति। तत्र जायमानमन्वितज्ञानं न पदेभ्यः, त्वन्मते कार्यान्वितार्थशक्तत्वेन पदानां सिद्धार्थलक्षकत्वात्। लक्षकाणामन्वयाननुभावकत्वात्।

कथं तर्हि लक्षकाणामुपयोगो गुरुमते? प्रकरणादिवदनुभावकपदसहकारितयेत्यवेहि।

घोषमाणवकादिपदं हि तीरसिंहसादृश्याद्यन्वितस्वार्थानुभावकं, तत्र तीराद्युपस्थित्यपेक्षायां, स्वार्थसंबंधितीरादि स्मारयद्धि गङ्गादिपदम्। नच सिद्धार्थकवाक्येऽनुमानादेवान्वितज्ञानोत्पत्तिः, कार्यवाक्येऽपि तथैव स्यादिति पदानामन्विते शक्त्यभावापत्तेः। नच "सिद्धार्थकवाक्यमन्वितज्ञानं न जनयति, किन्तु मूकं" इति युक्तम्; कार्यवाक्यमपि तथैव स्यादित्यविशेषात्। "तत्र पदैरभिहिताः पदार्था ज्ञानजनकाः" इति, तर्हि क्षिप्रत्वात्सर्वत्र तथाऽस्तु।

यदुक्तं "शक्तित्रयकल्पनागौरवमिति, तदसन् "पदस्यार्थे शक्तिः नार्थस्यान्वयेऽपि" इत्यभ्युपगमात्। कारकेऽभिहिते क्रियासामान्यान्वयस्याक्षेपादेव बोधात्। अर्थस्यान्वये शक्त्यभावे विशेषान्वयबोधः कथमिति चेत्; तव मते वा कथम्? हेषाशब्देनाश्वेऽनुमिते "किं गच्छति? तिष्ठति वा?" इति क्रियासापेक्षे; मानान्तरेण स्थितिक्रियायां निश्चितायां "किं गौः? किमश्वः?" इति कारकापेक्षायां, "गौर्गच्छति" इति वाक्ये दैवात्प्रयुक्ते, "अश्वो गच्छति, गौस्तिष्ठति" इति बोधः स्यात्, परस्परान्वयबोधो न स्यात्। अश्वस्थितिक्रिययोरशब्दसन्निधानेऽपि मानान्तरेण सन्निधानात्। सन्निधानमात्रस्य अर्थाध्याहारवादिनस्तव मते कारणत्वात्।

यदि च समभिव्याहृतानां संभूयकारित्वस्य व्युत्पन्नत्वात् न गो-गच्छति-पदे मानान्तरोपस्थितस्थित्यश्वान्वितस्वार्थबोधके इति; तर्हि गवादिपदेनाभिहितार्थः आनयनाद्यन्वयविशेषमेव लक्षयति पदान्तरसमभिव्याहारो नियामक इति विशेषान्वयबोधो युज्यतेऽस्मन्मते इति। अयं च विशेषो धवखदिरावित्यत्र क्लृप्तः। अत्र धवौ खदिरौ चेति विग्रहः, युगपदधिकरणवचनो द्वन्द्व इत्येतस्मान्नियामकात् द्वन्द्वसमासः प्रतिपदं युगपद्द्रव्यद्वयवाची स्यादित्यर्थात्। तथा च धवपदाभिहितो धवः द्वित्वसंपत्तये सद्वितीयमात्मानं लक्षयन्, खदिरपदसमभिव्याहारात् खदिरेण सद्वितीयमात्मानं लक्षयति। एवं खदिरपदरहितोऽपि। एतेनाशाब्दत्वमपि प्रत्युक्तम्, भवति लक्षणायामेकवाक्यत्वस्य निमित्तत्वेन तन्निमित्तकत्वलक्षणशाब्दत्वोपपत्तेः।

यच्च पदेषु अर्थशक्त्युद्बोधिका शक्तिस्तृतीयेति, तदपि न, तदभावे बाधकाभावात्। न च मानान्तरोपस्थितार्थानामप्यन्वयबोधकत्वापत्तिः बाधिकेति वाच्यम्; शब्दसन्निधानस्य कारणत्वेन तदप्रसङ्गात्। अत एवापरिपूर्णवाक्ये "पीनो दिवा न भुङ्क्ते" इत्यादौ "रात्रौ भुङ्क्ते" इति शब्दाध्याहारः। अयं चाभ्युपगन्तव्यो नार्थाध्याहार इति गुरुपक्षः। अन्यथा "सूर्याय" इत्यादिशब्दप्रक्षेपलक्षणोहासिद्धिप्रसङ्गात्। अत एव "त्रयो ब्राह्मणास्सन्ति कठकौण्डिन्या"विति वाक्यमनुपपन्नं, माठरश्चेति शब्दोपस्थितं माठरमादायोपपादयन्त्यभियुक्ताः, न प्रत्यक्षाद्युपस्थितं तमादाय। तत्सिद्धं न शक्तित्रयकल्पनमिति। त्वन्मते च पदस्यान्वये शक्तिरन्विते चेति गौरवम्।

ननु न गौरवं, अन्वित एव शक्त्यङ्गीकारात्। न चान्वयस्य शब्दजन्यप्रत्ययविषयत्वं न स्यात्, अन्वये शक्त्यभावादिति सांप्रतम्; जातिमात्रशक्तैः पदैर्व्यक्तिरप्यपर्यवसानात् यथा प्रतीयते, तथा अन्वयोऽपीति वक्तुं शक्यत्वादिति चेत् न; व्यक्तिरपि पदशक्तिविषयः, लक्षणां विना शब्दप्रत्ययविषयत्वादिति व्यक्तावपि लक्षणां विना शाब्दत्वपक्षे शक्त्यवश्यंभावेन दृष्टान्तासिद्धेः। ततो न व्यक्तेः शाब्दत्वं किन्तु जातेरेव, सा च व्यक्तिमाक्षिपतीत्येव युक्तम्। तत्सिद्धं शक्तिकल्पनागौरवमिति।

किञ्च, यदि पदानां प्रमाणता, तदा "तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वा"दिति सूत्रविरोधः, "पदानि स्वं स्वमर्थमभिधाय निवृत्तव्यापाराणि अथेदानीमभिहिताः पदार्था वाक्यार्थं बोधयन्तीति भाष्यविरोधश्च स्यात्। यदप्युक्तं, प्राथम्यात् पदानामेव प्रमाणतेति, हास्यमेतत्। अव्यवधानात् पदार्थानामेव प्रमाणत्वौचित्यात्। पदज्ञानं-पदार्थस्मृतिः वाक्यार्थबोधः इति हि क्रमः।

तदयं निष्कर्षः—

न पदानां प्रमाणता, सिद्धार्थवाक्येषु पदार्थानामेव प्रमाणत्वौचित्यात्, शक्तिद्वयकल्पनागौरवात्, सूत्रभाष्यविरोधात्, अव्यवधानाच्च। शक्तिलाघवात्, सूत्रभाष्यानुसारात्, अव्यवधानाच्च पदार्थानामेव प्रमाणता वाक्यार्थ इति। अयञ्च विशेषो द्रष्टव्य इति, मत्वर्थीयप्रत्ययानामन्विते शक्तिः, "हिरण्यमालिन ऋत्विजः प्रचरन्ति" इत्यत्र विशेषणविशेष्ययोर्हिरण्यमालर्त्विक्शब्दोक्तत्वेन पारिशेष्यात्। सुप्तिङ्प्रत्ययानाञ्चान्विते शक्तिः, "पशुना यजेतेति" सकृदुच्चारितेन सुपा लिङ्गसंख्याकारकाणां प्रतीतेः। "यजेते"ति सकृदुच्चारितेन तिङा शब्दभावनार्थभावनैकत्वानां त्रयाणां प्रतीतेः नियमेन। अन्यथा अनेकशक्तिकल्पनाप्रसङ्गात्। इतरेषान्तु शब्दानां केवलार्थाभिधायितेति।

ननु पदाभिहिताः पदार्थाः वाक्यार्थं लक्षयन्तीत्येतदनुपपन्नम्, लक्षणाबीजस्याविनाभावस्याभावादिति चेन्न; तदभावेऽपि एकवाक्यत्वस्य तादृशस्य सत्त्वात्। तत्तु 'सोमेन यजेत" त्यादौ क्लृप्तं, "समिधो यजति" "दर्शपूर्णमासाभ्यां यजेत" त्यादौ कल्प्यमिति।

इति वाक्यार्थमूलविवेकः

विध्यर्थः कः? इति निरूपणीयम्। अत्र गुरवः— कार्यत्वमेव विध्यर्थः, प्रवर्तकज्ञानविषयो हि विध्यर्थः। घटमानयेति प्रयोजकवाक्यश्रवणसमनन्तरं घटानयने कृतिसाध्यत्वज्ञानात् प्रयोज्यवृद्धः प्रावर्तिष्टेति निर्विवादम्। तथाच कार्यत्वे लिङादीनां शक्तिग्रहो लोके। नच लोके कार्यत्वे शक्तिग्रहेऽपि वैदिकानां लिङादीनां तदेवाभिधेयमिति कोऽयं निर्बन्ध इति वाच्यम्, लोकवेदाधिकरणे "य एव लौकिकानां पदानामर्थास्त एव वैदिकाना" मपीति निर्णयात्। यद्येवं धात्वर्थकार्यत्वस्यैव विधिवाच्यत्वापत्तिः तत्रैव लौकिकशक्तिग्रहादिति चेन्न, कार्यत्वमात्रे शक्तिग्रहात्। तच्च कचिद्धात्वर्थनिष्ठं कचिदन्यनिष्ठञ्चेत्यन्यदेतत्। नच तज्ज्ञानस्य प्रवर्तकत्वे विषसंपृक्तान्नभक्षणेऽपि प्रवर्तेतेति वाच्यम्, इष्टसाधनताबोधाभावात्। नच विषसंपृक्तमप्यन्नमिष्टां तृप्तिं प्रत्यश्नतो निर्वर्तयदिष्टसाधनताबोधमादधातीति सांप्रतम्, तस्यास्तृप्तेर्बलवदनिष्टानुबन्धित्वेन इष्टत्वाभावात्। यदि च बलवदनिष्टानुबन्धित्वं न जानाति, जानाति चेष्टसाधनत्वं, कृतिसाध्यत्वञ्चान्नभक्षणस्य, प्रवर्तत एव तदन्नभक्षणे तदा। ततश्च कार्यत्वमेव लिङाद्यर्थः, इष्टसाधनत्वं बलवदनिष्टाननुबन्धित्वञ्च प्रमाणान्तरतोऽवगन्तव्यम्। अन्यथा अनेकशक्तिकल्पनापत्तेः।

नच बलवदनिष्टाननुबन्धीष्टसाधनत्वविशिष्टे कार्यत्वे एकैव शक्तिरिति वाच्यम्; कार्यत्वविशिष्टे बलवदनिष्टाननुबन्धित्वे इष्टसाधनत्वे शक्तिरित्यपि सम्भवात्, ऐच्छिकत्वाद्विशेषणविशेष्यभावस्य। नहि व्रीहीनित्यादौ, लिङ्गं संख्या कारकञ्चेत्यनेकार्थभानेऽपि लिङ्गसंख्याविशिष्टे कारके यथा एकैव शक्तिः, तथेहापीति सांप्रतम्; वैषम्यात्। कारकं प्रधानं लिङ्गसंख्ये गुणौ। गुणाश्च विशेषणं, प्रधानञ्च विशेष्यम्। अतो लिङ्गसंख्याविशिष्टे कारके शक्तिरेका। न पुनः प्रकृते, कार्यत्वं प्रधानं इष्टसाधनत्वं गुणः, तत्राप्रधानं कार्यत्वं गुणः इत्यत्र कश्चिदस्ति साक्षी। तत्सिद्धं लोकवेदयोः कार्यत्वमेव विध्यर्थ इति।

वस्तुतस्तु, पूषादिशब्दस्येव लिङादेरपि वेद एव शक्तिग्रहः। तथाहि–दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते"ति हि वाक्यं गृह्णन् स्वर्गकामपदसमभिव्याहारात् धात्वर्थं स्वर्गसाधनमादौ प्रत्येति। पुनः पर्यालोचयति "कथं विशरारुर्धात्वर्थः कालान्तरभाविनं स्वर्गमुत्पादयिष्यतीति। अथ तद्व्यतिरिक्तं स्थायि कालान्तरभावि स्वर्गजननसमर्थं तर्कयति। तर्किते च तस्मिन् लिङादेश्शक्तिं गृह्णाति। तस्यैव च "कार्यं, नियोगः, अपूर्वं इति च शब्दा अभिधायकाः। कथं तर्हि घटमानयेत्यादिविधिप्रयोगः? नहि तत्रापूर्वमस्ति। शृणु! "अदितिमोदनेन" इत्यादिवाक्यशेषात् ओदनादिवाच्यत्वेनावगतस्य चर्वादिशब्दस्य लोके स्थाल्यादौ लक्षणया प्रयोगवत् धात्वर्थकार्यत्वे लक्षणया प्रयोग इति।

काणभक्षाक्षपादास्तु —

इष्टसाधनत्वमेव विध्यर्थः, लोके तज्ज्ञानादेव प्रवृत्तिदर्शनात्। नच कार्यताज्ञान-मिष्टसाधनताज्ञानमित्यत्र नियामकाभावः, चन्द्रमण्डले विषसंपृक्तान्नभक्षणे च मा प्रवर्तिष्टेति उभयोरपि प्रवर्तकत्वात्। नचानेकशक्तिकल्पनापत्तिः, कार्यत्वविशिष्टेष्टसाधनत्वस्यैव विध्यर्थत्वात्। नच विशेषणविशेष्यभावानियमः, इष्टसाधनत्वस्य प्रथमोपस्थितस्य प्रवर्तकत्वे क्लृप्ते तत्रातिप्रसङ्गभङ्गाय कार्यत्वादेर्विशेषणत्वात्। इष्टप्रत्यय एव प्रथमतः, स्वरसतः इष्टप्रवणं हि चित्तं, तद्गर्भं चेष्टसाधनत्वम्। नैवं कार्यत्वं, तस्य क्लेशात्मकव्यापारगर्भत्वात्। यदुक्तमिष्टसाधनत्वादि मानान्तरगम्यमिति, तदनुपलम्भात्। न चेदमिष्टसाधनं कृतिसाध्यत्वात् इत्यनुमानमिति सांप्रतम्, कूपपतनादौ व्यभिचारात्। तत्सिद्धं कार्यत्वविशिष्टमिष्टसाधनत्वमेव विध्यर्थ इति। नचेष्टसाधनत्ववाचकेनैव विधिना इष्टस्य स्वर्गादेः प्रतीतत्वेन स्वर्गादिफलपरत्वे, षाष्ठप्रथम-नयासिद्धस्य श्रुतस्वर्गादिपदस्य, विश्वजिन्नयसिद्धस्य तदध्याहारस्य, प्रतिष्ठाफलपरस्य "प्रतितिष्ठन्ती" इत्यर्थवादस्य, अङ्गेषु क्रतूपकारलक्षणफलबोधकस्य प्रकरणस्य च वैयर्थ्यमिति वाच्यम्; विधित इष्टसामान्ये प्रतीते व्यपेक्षिततद्विशेषसमर्पकत्वेन सार्थक्यादित्याहुः।

अत्र वदन्ति भट्टमतानुसारिणः —

नेष्टसाधनत्वं विध्यर्थः, "माणवक! सन्ध्यावन्दनमिष्टसाधनं, तस्मात्संध्यामुपास्व" इति प्रयोगानुपपत्तेः पौनरुक्त्यात्। एतेन कार्यत्वपक्षोऽपि प्रत्याख्यातः, "माणवक! संध्यावंदनं कार्यं तस्मात्सन्ध्यामुपास्व" इति हि प्रयुञ्जते। यद्यपि नेदं गुरुमते शक्यशङ्कं, "सन्ध्यावन्दनं कार्यं" इत्यनेन सामान्यतः कार्यत्वे शक्तावपि, "तस्मात्सन्ध्यामुपास्व" इति संबोध्य-कर्तृविशेषसंसर्गितया कार्यत्वाभिधानेनार्थभेदात्। अत एव माणवक! सन्ध्यावन्दनं त्वया कार्यं, त्वं कुरुष्व" इत्युक्त्वा न पुनः प्रयुञ्जते "सन्ध्यामुपास्वे"ति। एवं "सन्ध्यावन्दनमिष्टसाधनं" इत्युक्तया सामान्यत इष्टसाधनत्वप्रतीतावपि, सन्ध्यामुपास्वेति वाक्ये सम्बोध्यपुरुषसम्बन्धीष्ट-साधनत्वाभिधानेनार्थभेदात्, इष्टसाधनत्वं विध्यर्थः" इति पक्षेऽपि न पौनरुक्त्यम्। "अन्यथा सन्ध्यावन्दनं कार्यं, तस्मात्सन्ध्यामुपास्व" इति व्यक्तोद्भूयां विधिप्रतीतेरविशेषात् पौनरुक्त्यं स्यादिति परिचोदिता भट्टमतानुसारिणः किं ब्रूयुः?

अत एव इष्टसाधनत्वं विध्यर्थ इति वादिनो विधिप्रत्ययेन इष्टप्रतीतेः स्वर्गकामादिपदानां वैयर्थ्यं स्यादिति परेरितां शङ्कां, तेनेष्टसामान्यप्रतीतावपि तद्विशेषपरतया सार्थक्यमिति पर्यहार्षुः, अभ्युपगमश्चेमं परिहारं परे। तथापि कार्यत्वं न विध्यर्थः। तन्मात्रस्य विध्यर्थत्वे वेदेऽपि धात्वर्थ-

कार्यत्वस्यैव विध्यर्थत्वापत्तिः। नच विशरारोर्धात्वर्थस्य कालान्तरभाविस्वर्गकामकामिकार्यत्वानुपपत्तौ, तद्व्यतिरिक्तापूर्वकार्यवाचित्वं बलादापततीति वाच्यम्, लोकक्लृप्तधात्वर्थकार्यताशक्तिग्रहविरोधात्, तत्पूर्वकत्वाद्वेदप्रवृत्तेः। अनुपपत्तेश्चार्थापत्तिकल्पितापूर्वेण शान्तेः।

किञ्च किन्नाम कार्यत्वम्? न तावत्कृतिसाध्यत्वं, धात्वर्थेऽतिप्रसक्तेः। असंभवाच्च, अपूर्वस्य कृतिसाध्यत्वाभावात्। नापि कृत्युद्देश्यत्वम्, स्वर्गादावपि प्रसक्तेः, तस्य काम्यत्वेन कृत्युद्देश्यत्वात्। कामनाविषयं ह्युद्दिश्य तत्साधने प्रवर्तन्ते लोकाः। नापि कृतिसाध्यत्वे सति प्रधानत्वम्, साक्षात् कृतिसाध्यत्वस्य अपूर्वेऽभावात् परंपरया कृतिसाध्यत्वस्य स्वर्गादावपि भावात्, तस्य काम्यत्वेन प्रधानत्वाच्च। नापि कृतिसाध्यत्वविशिष्टेष्टसाधनत्वं विध्यर्थः, विशिष्टविधाविव विशिष्टाभिधानेऽपि गौरवात्। विशेषणविशेष्यभावस्य कामचारत्वेनानेकशक्तिकल्पनापत्तेश्च। प्रथमप्रतीतत्वस्य विशेषणत्वे विशेष्यत्वे वा अनियामकत्वात्, प्रत्युत विशेषणभाव एव नियामकत्वात्। अत एव विशिष्टज्ञाने विशेषणज्ञानं कारणमिति वक्तारः प्रथमोपस्थितिं विशेषणत्व एव नियामकमिच्छन्ति। तस्माल्लिङादिव्यापार एव विध्यर्थः।

नच लिङादिव्यापारस्य न प्रवर्तकत्वं, इष्टसाधनताज्ञानस्यैव प्रवर्तकत्वदर्शनादिति वाच्यम्; उक्तदूषणेनेष्टसाधनत्वस्य विधिवाच्यत्वासंभवेन तद्ज्ञानस्य शाब्दत्वाभावेऽपि आर्थिकस्य तस्य संभवात्। तथाहि— प्रवर्तनात्मा विधिः स्वविषये पुरुषं प्रवर्तयन्ननिष्टसाधने पुरुषस्य प्रवर्तयितुमशक्यतया, अर्थात्स्वविषयस्य इष्टसाधनतां ज्ञापयतीति। तस्यैव च विध्यर्थस्य लिङादिव्यापारस्याभिधा भावना प्रवर्तना इति शब्दाः अवस्थाभेदेन वाचकाः।

ननु शब्दो यदि गुणः, न तदा तस्य व्यापारसंभवः। यदि द्रव्यं, तथापि न विभुत्वेनाङ्गीकृतस्य स इति; मैवम्, चलनाद्यसम्भवेऽपि ज्ञानात्मकस्य तस्य तद्विषयकस्य संभवात्।

नन्वेवं तस्याभिधारूपत्वं न संभवति, अभिधाव्यापारे शब्दस्य "अभिधत्ते" इति व्युत्पत्त्या कर्तृत्वात्। अभिधीयते येनेति व्युत्पत्त्या करणत्वात्। ज्ञानमेव चेदभिधा, एकस्यैव शब्दस्य एकस्मिन् व्यापारे कर्तृत्वकरणत्वयोरन्यतरस्य, गुणत्वस्य, कर्मत्वस्य च प्राधान्यस्य युगपदापत्तेरिति चेत्; मैवम्, परशुवदविरोधात्। यथाहि उद्यमनादिव्यापारः ऊर्ध्वाधोदेशफलवत्तया यदा विवक्ष्यते तदा उद्यच्छति नियच्छतिधात्वभिधानं लभते, तत्फलशालिनं परशुञ्च कर्मकारकम्। यदा स एव व्यापारः द्वैधीभावफलवत्तया विवक्ष्यते, तदा छिनत्तिधात्वभिधानं लभते, तत्फलशालिनं वृक्षं कर्मकारकम्, परशुञ्च करणकारकं लभते। तथा

यदा लिङादिव्यापारो लिङादिस्फुरणफलवत्तया विवक्ष्यते, तदा जनात्यादिधात्वभिधानं लभते तत्फलशालिनं लिङादिकं च कर्मकारकम्। यदा स एव व्यापारोऽभिधेयस्फुरणफलवत्तया विवक्ष्यते, तदा अभिदधातिधात्वभिधानं लभते, तत्फलशाल्यभिधेयं कर्मकारकं लिङादिकं च कर्तृकारकम्। यदा प्रवृत्त्युत्पत्तिफलवत्तया विवक्ष्यते, तदा भावयतिधात्वभिधानं लभते, तत्फलशालिनीं प्रवृत्तिश्च कर्मकारकं, लिङादिस्तु कर्ता स्थित एव। यदा पुरुषप्रवृत्तिफलवत्तया विवक्ष्यते, तदा प्रवर्तयतिधात्वभिधानं लभते, तत्फलशालिनं पुरुषश्च कर्मकारकम्। ततश्च भावनात्मा लिङादिव्यापारः स्वसमानप्रत्ययापात्तामार्थभावनां भाव्यत्वेन, वाच्यवाचकसंबन्धबोधं करणत्वेन, अर्थवादसमर्पितां प्ररोचनां इतिकर्तव्यतात्वेन च स्वीकृत्य निर्वृणोतीति।

पार्थसारथिस्तु—

नायं भट्टपादाभिप्रायः। तथाहि— अभिधामात्रस्य विधिवाच्यत्वे घटादिपदनिष्ठाभिधाया अपि विधिवाच्यत्वापत्तिः लिङाद्यभिधायास्तत्त्वे, विशेषणीभूतलिङादिकमनभिधाय तदभिधाया अभिधातुमशक्यत्वेन स्वस्य स्ववाच्यतापत्त्या आत्माश्रयापत्तेः, निषेधवाक्याप्रामाण्यापत्तेश्च। "न कलञ्जं भक्षयेत्"इत्यादीनि निषेधवाक्यानि हि, प्रत्ययेन विध्यर्थं प्रवर्तकमनूद्य नञा प्रतिषेधन्ति। प्रवर्तकञ्चेष्टसाधनत्वमेव ज्ञायमानं लोकतः प्राप्तं, न लिङादिव्यापारः, यमनूद्य प्रतिषेधेयुः। किन्तु प्रवर्तनासामान्यमेव विध्यर्थः, तत्रात्माश्रयादिदोषाभावात्। तच्च प्रवृत्तिहेतुर्धर्मः। सच प्रत्ययवाच्यार्थभावनागतमिष्टसाधनत्वमेव। अपौरुषेये वेदे, प्रेषणस्य उत्कृष्टकर्तृकनिकृष्टकर्मकप्रवर्तनारूपस्य, अध्येषणस्य निकृष्टकर्तृकोत्कृष्टकर्मकप्रवर्तनारूपस्य, उत्कृष्टादिसाधारण्येन पुरुषमात्रकर्तृकस्वयंप्रवृत्तपुरुषकर्मकप्रवर्तनारूपाभ्यनुज्ञाया वा असंभवात्॥

नन्विष्टसाधनतया विध्यर्थत्वे "शब्दभावना विध्यर्थः" इति वार्तिकविरोध इति चेन्न; "प्रवृत्त्युत्पत्तिप्रयोजना शब्देन ज्ञाप्यमाना इष्टसाधनतैव शब्दभावना" इत्यविरोधात्। नचैवं सति चन्द्रमण्डलादौ प्रवृत्तिप्रसक्तिः, कार्यताज्ञानाभावात्। हन्त! तर्हि कार्यताया अपि विध्यर्थत्वापत्तिः, न तज्ज्ञानस्यार्थिकत्वात्। विधिर्हि अकृतिसाध्ये पुरुषस्य प्रवर्तयितुमशक्यतया स्वविषयस्य कृतिसाध्यतामर्थात् ज्ञापयति। नच वैपरीत्यम्; लोके इष्टसाधनत्व एव लिङादेश्शक्तिग्रहात्। नच तत्रापि वैपरीत्यम्; पुरुषाणामिष्टभावनाभावितचेतस्तया इष्टस्यैव प्रथमोपस्थितत्वेन तद्घटितेष्टसाधनत्व एव प्रयोज्यवृद्धव्यवहारेण लिङादेः शक्तिग्रहात्। सच विधिः समानप्रत्ययोपात्तामर्थभावनां विधेयत्वेन स्वीकरोति। करणादीनां विधेयत्वन्तु, विशिष्टभावनायाः विधेयत्वं विशेषणानां विधेयत्वाभावे न पर्यवस्यतीत्यार्थिकम्। हन्त! तर्हि विशेषणत्वाविशेषात् भाव्यस्य

स्वर्गादेरपि विधेयत्वापत्तिः अनिष्टश्चैतत्, प्रयाजादिवदङ्गत्वापत्तेरिति चेन्न; यतो विध्यधीनप्रवृत्ति-विषयत्वं रागाधीनप्रवृत्तिविषये स्वर्गादौ बाधितं करणेतिकर्तव्यतयोरवतरति, अत एव करणांशे रागत एव प्रवृत्तिः, इतिकर्तव्यतांशे विधित इति तस्यैव विधेयत्वं न करणांशस्येति काम्यनियोग-प्रदेशेष्वभ्युपगच्छन् गुरुमतानुसारिणः ।

ननु शब्दभावना अर्थभावनां स्वरूपतो विधत्ते? अंशविशिष्टां वा? नाद्यः, करणादे-र्विशेषणभावाभावेन आर्थिकस्यापि विधेयत्वस्यासंभवापत्तेः । द्वितीये विधिसम्बन्धात् प्रागेवार्थभावना स्वांशैः सम्बध्यत इति वक्तव्यम् । तथा च "भिन्नपदोपात्तं स्वर्गं भाव्यत्वेन स्वीकरोति" इत्यस्मिन्नर्थे विधिसम्बन्धो विहाय समानपदोपात्तं धात्वर्थमेव भाव्यत्वेन स्वीकुर्यात्; "समान-पदोपात्तमपि धात्वर्थं क्लेशात्मकत्वेनापुरुषार्थत्वादुज्झित्वा भिन्नपदोपात्तं स्वर्गमेव भाव्यत्वेन स्वीकरोति" इत्यस्मिन्नर्थे विधिसम्बन्धो हि मूलम् । नचार्थभावनायाः स्वांशैः सम्बन्धदशायां विधिसंबन्धो-ऽस्ति, अत एवौदुम्बराधिकरणे भवतिना प्रतीतभावनाक्षिप्तार्थभावनायां औदुम्बरत्वमेव भाव्यं, प्रत्ययार्थस्तु सतूर्ध्वरोध इति निरूपितमिति चेदुच्यते :—

समानप्रत्ययश्रुत्यादौ स्वरूपेण विधिसम्बन्धः । सच यादृशैर्भाव्यकरणांशैर्विना न निर्वहति तादृशानि तानि स्वर्गधात्वर्थप्रयाजादीनीति । नन्वेतावता करणेतिकर्तव्यतयोर्विधेयत्वं कथम्? इत्थम्—स्वरूपेण कृत्यसाध्यार्थभावनायां प्रतीतं विधेयत्वं स्वांशकरणेतिकर्तव्यतयोरवतरति प्रकरणप्रत्यासत्तिभ्यां, वाजपेयाङ्गत्वेन प्रतीतं सप्तदशारत्नित्वमिव तदङ्गोर्ध्वपात्रे । नेदं निदर्शनम् यूपद्वारा पश्वङ्गत्वात् सप्तदशारत्नित्वस्य । ततःक्रयाङ्गमरुणिमा तदङ्गे गवि निविशमानो निदर्शनमिति । स्वर्गादिकरणत्वञ्च साधनताविशेषरूपं नश्वरस्य यागादेः श्रुतार्थापत्तिपरिकल्पितापूर्व-द्वारेण । यथा "अनुभूते स्मृतिर्नाननुभूते" इत्यन्वयव्यतिरेकावगतस्मृतिसाधनत्वं संस्कारद्वारेण । यथा काष्ठानां पाकसाधनत्वं ज्वालाद्वारा । यथा चावगोरणस्य यातनासाधनत्वं दुरितापूर्वद्वारेण । यथा-चाग्नेयादिकर्मणां परमापूर्वसाधनत्वमुत्पत्त्यपूर्वद्वारेणेति ।

स विधिश्चतुर्विधः — उत्पत्तिविधिः विनियोगविधिः प्रयोगविधिः अधिकारविधिश्चेति । आद्यो द्वितीयाध्याये निरूपितः । विनियोगविधिः शेषत्वनिरूपणपरे तृतीये । प्रयोगविधिश्चतुर्थ-पञ्चमयोः, तौ हि प्रयोगविध्यर्थमनुष्ठानञ्च क्रमञ्च क्रमेण निरूपयितुं प्रवृत्तौ । अधिकारविधिः षष्ठे । तत्र ह्यधिकारविध्यर्थफलानिरूपणम् ।

अर्थवादस्तु त्रिविधः — गुणवादः अनुवादः भूतार्थवादश्चेति । यत्र प्रतीयमानार्थो मानान्तरेण विरुध्यते स गुणवादः, यथा "यजमानः प्रस्तरः" इत्यादिः । यत्र प्रतीयमानोऽर्थो

मानान्तरेण प्राप्तः सोऽनुवादः, यथा "अग्निर्हिमस्य भेषज"मित्यादिः। यत्र प्रतीयमानोऽर्थो मानान्तरेण न विरुध्यते नच प्राप्तः; स भूतार्थवादः, यथा "इन्द्रो वृत्राय वज्रं प्रायच्छ"-दित्यादिः।

ननु केयं गौणी वृत्तिः? केचिदाहुः — वाच्यैकदेशवृत्तित्वमिति। सिंहादिशब्दानां हि सिंहत्वादिजातिः सिंहादिव्यक्तिः, क्रौर्यादिगुणः हननादिक्रिया इत्येतेषां समुदायो वाच्यः। तदुच्चारणेन तस्य प्रतीतेः। "सिंहो माणवक" इति सिंहशब्दवाच्यैकदेशक्रौर्यगुणयोगान्माणवके सिंहशब्दप्रवृत्तिरिति। तदसङ्गतम् — "अनित्यो घटः" इति वाक्ये वाच्यैकदेशव्यक्तौ घटपद-लक्षितायां अनित्यत्वान्वयान्मुख्यलक्षणायामतिव्याप्तिः। वृद्धे सिंहे क्रौर्यादिरहिते जात्यभिप्रायेण प्रयुक्तः शब्दः वाच्यैकदेशं जातिं शक्त्योपस्थापयतीति शक्तावतिव्याप्तिश्च। "सिंहत्वादिजातौ सत्यां सिंहादिशब्दप्रयोगः, तदभावे न" इत्यन्वयव्यतिरेकाभ्यां जातेरेव शब्दवाच्यत्वेन समुदाय-वाच्यत्वे प्रमाणाभावेन असंभवाच्च।

अपरे त्वाहुः — माणवकगतमारोपितं सिंहत्वं सिंहशब्दो ब्रवीतीत्यारोपितार्थवृत्तित्वं गौणत्वमिति। तदपि मन्दम् — "यजमानः प्रस्तर" इत्यादीनामप्रामाण्यापत्तेः। आरोपितस्य बाधितत्वेनाबाधितार्थपरत्वात्। अथ यजमानत्वारोपद्वारा प्रस्तरादिस्तुतौ तात्पर्यं अर्थवादानां स्तुतिश्च न बाधितेति नाप्रामाण्यमिति चेत्; एवमपि "खपुष्पं भवत्सिद्धान्तः" इत्यादावव्याप्तिः। तत्र हि सिद्धान्ते आरोपितं खपुष्पत्वं खपुष्पशब्दो ब्रवीतीति वक्तव्यम्, नच तत्संभवति असतस्तस्यारोपायोगात्।

तस्माल्लक्ष्यमाणगुणान्वयिवस्तुज्ञापकवृत्तित्वं गौणत्वं; अस्ति च सिंहो माणवक इत्यादौ सिंहशब्दलक्ष्यक्रौर्यादिगुणान्वयिमाणवकवस्तुपरत्वम्। खपुष्पं भवत्सिद्धान्त इत्यत्रापि खस्य पुष्पात्मना विकारो यथा असन् तथा भवत्सिद्धान्तोऽपीति खपुष्पशब्दलक्ष्यासत्त्वगुणान्वयि-सिद्धान्तवस्तुपरत्वमिति भट्टमतानुसारिणः।

स्तुतिनिन्दापरैरेवार्थवादैः कर्तव्यं न कर्तव्यं इति बोधनपूर्वक प्रवृत्तिनिवृत्तिसिद्धेर्विधि-निषेधौ व्यर्थौ। प्रत्ययप्रयोगस्तु "न केवला प्रकृतिः प्रयोक्तव्या" इति प्रकृतेः साधुत्वमात्रसिद्धये इति प्रत्ययोत्खातिनः। नूनं ते सकलमीमांसाशास्त्रं व्याकुलभावमापादयितुं प्रावर्तिषत। नह्यङ्गेनाङ्गिनो वैयर्थ्यं कश्चिदापादयितुमुत्सहते। प्ररोचनमङ्गं विधिश्चाङ्गीति। नवा प्ररोचन-निन्दाभ्यां कर्तव्यस्याकर्तव्यत्वबुद्धिरुत्पद्यते। न ह्यग्निहोत्रादिकं प्रशस्तमित्यन्यात उपश्रुत्य परिव्राजकाः कर्तव्यमिति मन्वते। कर्तव्यमस्माभिरिति तु न मन्वत इति चेत्; एवमपि कर्तव्यतापरत्वं

विधिप्रत्ययस्य, तदपेक्षितप्ररोचनामात्रपरत्वमर्थवादानामिति व्यवस्थाऽभ्युपगन्तव्या, उभयाम्नानबलात्। अपिच निरर्थवादवाक्येषु विधिप्रत्ययादेव कर्तव्यताबोधनद्वारा प्रवृत्तिरभ्युपगन्तव्या, इतरत्रापि तथेति किमनुपपन्नम्?

इति विधितत्त्वविवेकः

अथातो धर्मजिज्ञासा

अथ=वेदाध्ययनानन्तरं, अतः=वेदार्थस्य विवक्षितत्वात्, धर्मजिज्ञासा=वेदार्थजिज्ञासेति। अत्र धर्मशब्दो वेदार्थपरः, वेदपराथातः शब्दसहचारात्। एवं शास्त्रार्थं प्रतिज्ञाय प्रथमाध्यायार्थश्चोदनाप्रामाण्यरूपः प्रतिज्ञातः "चोदनालक्षणोऽर्थो धर्म" इति, "अथातः शेषलक्षणम्" "अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा" इत्यादिवत्। नच प्रथमपादार्थमात्रप्रतिज्ञापरमिदं सूत्रमिति वाच्यम्; त्रिपाद्या अप्रतिज्ञातार्थविचारपरत्वापत्तेः। चोदनाशब्देनार्थवादमन्त्रस्मृत्याचारनामधेयानामपि ग्रहणेन तत्प्रामाण्यविचारप्रतिज्ञापरत्वाभ्युपगमे, प्रवर्तकवाक्यमात्रपरस्य, चोदनाशब्दस्य, विधिवाक्येन पदैकवाक्यतापन्नेष्वर्थवादेषु, वाक्यैकवाक्यतापन्नेषु मन्त्रेषु, विधिवाक्यानुमापकेषु स्मृत्याचारेषु, विध्येकदेशनाम्नि च लक्षणापत्तेश्च। नचैवं सत्यध्यायेन त्रिपादी न संगच्छेत, तत्रार्थवादादिप्रामाण्यस्यैव विचारितत्वेन चोदनाप्रामाण्यस्याविचारितत्वादिति वाच्यम्; तत्रापि तत्तन्नये "चोदनाप्रमाणं नवा, तदर्थमर्थवादः प्रमाणं न वा, स्मृत्याचारनामधेयानि प्रमाणं नवा" इति संदिह्य चोदनाप्रामाण्यस्यैव विचारयितुं शक्यत्वात्। अन्यथा "द्रव्यार्जनादिः क्रतुशेषः पुरुषशेषो वा" इति शेषशेषिभावविचारस्य प्रयुक्तिविचाररूपे चतुर्थेऽसंगत्यापत्तेः। यदि च "द्रव्यार्जनादि फलप्रयुक्तं क्रतुप्रयुक्तं वा? तदर्थं पुरुषार्थं क्रत्वर्थं वा? इति संदिह्य विचारप्रवृत्तेरध्यायसंगतिरिति; तर्हि प्रकृतेऽपि तथा। तस्मात् चोदनाप्रामाण्यविचार एव प्रथमाध्यायार्थः। शास्त्रप्रामाण्यविचार इत्युक्तं भवति। चोदना हि शास्त्रं प्रवृत्तिनिवृत्त्यन्यतरफलकत्वात्। तदुक्तम्:—

> "प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा।
> पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते॥" इति।

तच्छास्त्रं भिन्नमभिन्नं वेति जिज्ञासायां "यजति—ददाति" इत्यादौ भेदं अन्यत्राभेदं निरूपयितुं द्वितीयः प्रवृत्तः।

ननु शास्त्रप्रामाण्यतद्भेदरूपयोः प्रथमद्वितीयाध्याययोः अर्थविचारात्मके शास्त्रे का संगतिः? इति चेत्; परमते प्रथमाध्यायस्यैवोपोद्घातसंगतिरिति ब्रूमः। ननु धात्वर्थभेदस्य भावनाभेदस्य वा द्वितीयाध्यायार्थस्योपपत्तौ न शास्त्रभेदस्य तदर्थत्वमिति चेन्न; यागदानादिरूपधात्वर्थस्य यत्नरूपाया भावनायाश्च लोकसिद्धत्वेन तत्प्रतियोगिकभेदस्यापि लौकिकत्वेन विचारानर्हत्वात्। वाक्यात्मकशास्त्रस्यापि लौकिकत्वेन तद्भेदस्यापि लोकसिद्धतया न विचार्यत्वमिति चेन्न; साक्षात्परंपरौदासीन्येनापूर्वपरपदकदम्बकस्यैव शास्त्रत्वात् तस्य चालौकिकत्वात्।

सच शास्त्रभेदः कचित्साध्यभेदेन, कचिदनुबन्धभेदेन। साध्यञ्चोत्पत्त्यादिभेदेनाष्टविधम्। तत्र "पिष्टं संयौति" इति शास्त्रं अवहननादिशास्त्राद्भिन्नं संयवनस्य पिण्डोत्पत्तिः फलं यतः। एवं "गां दोग्धि" "व्रीहीनवहन्ति" "व्रीहीन् प्रोक्षति" इतीमानि परस्परं भिन्नानि, आप्तिविकृतिसंस्कृतिलक्षणसाध्यभेदात्। "समिधो यजति" इत्यारादुपकारिशास्त्रं सन्निपत्योपकारिशास्त्रा"द्यदाग्नेय" इत्याद्युत्पत्तिशास्त्राच्च भिन्नम्। करणोपकारलक्षणसाध्यभेदात्। एवमुत्पत्तिशास्त्रमपीतरस्माद्भिन्नम्। करणान्तरव्यापारलक्षणसाध्यभेदात्। इमानि च सन्निपत्यारादुपकार्युत्पत्तिशास्त्राणि अधिकारशास्त्रेणैकशास्त्र्यमापन्नानि उत्पत्त्यादिसाध्यानां परमापूर्वार्थत्वेन स्वतन्त्रसाध्यभेदाभावात्। तच्च तेभ्यो भिन्नं, परमापूर्वस्य साध्यस्य स्वतन्त्रत्वात्। यावज्जीवशास्त्रं स्वर्गकामशास्त्राद्भिन्नं, इदञ्च तस्मात्; नित्यकाम्याधिकारलक्षणसाध्यभेदात्। "दध्नापयसेत्यादिशास्त्रं परस्परभिन्नम्, नियमादृष्टभेदादेव।

नियोगावच्छेदकत्वं अनुबन्धत्वं, तद्भेदाच्छास्त्रभेदः "यजति, ददाति, जुहोतीत्यादौ। तत्रहि यागदानहोमावच्छिन्नास्त्रयो नियोगाः प्रतीयन्ते। शास्त्रार्थनियोगभेदस्तु नाध्यायार्थः, शास्त्रभेदे विचारिते तद्भेदसिद्धेरार्थिकत्वात्। तदुक्तं, "योऽर्थो न स चोदनार्थं" इति। ननु मा भूवन् धात्वर्थभावनापूर्वभेदा अध्यायार्थाः, साध्यानुबन्धभेदौ तु भवेताम्; न, अर्थभेदेनाध्यायभेदप्रसक्तेः। हन्त! तर्हि चतुर्थाध्यायो भिद्येत, उत्पत्त्याद्यर्थभेदात्। न; स्वतो भिन्नत्वेऽप्युपादानप्रमाणगम्यत्वेनैकीकृतत्वात्। नन्वनयोरपि शास्त्रभेदहेतुत्वेनैकीकृतयोरध्यायार्थत्वं भवत्विति चेन्न, स्वत एकस्य शास्त्रभेदस्याध्यायार्थत्वे संभवति औपाधिकैक्यापन्नयोस्तदयोगात्। एवं तर्हि स्वत एकमुपादानप्रमाणमेव चतुर्थे विचार्यं स्यात्, अशास्त्रार्थत्वेऽपि तस्य शास्त्रार्थयोः शास्त्रप्रामाण्यभेदयोरिव विचार्यत्वसंभवादिति चेन्न; शास्त्रासंगत्यापत्तेः। अर्थविचारो हि शास्त्रेण संगच्छेत, "अथातो धर्मजिज्ञासे"ति तस्यैव प्रतिज्ञानात्। न चोपादानप्रमाणं कस्यचिच्छास्त्रस्यार्थः।

प्रथमद्वितीयौ चोपोद्घातसंगत्या शास्त्रसंगताविल्यवादिष्म। तत्र चातुर्थिकप्रथमनय प्रश्नम्:—"औपादानिकलक्षणमारम्भणीयं नवे"ति संशयः। तदर्थं चोत्पत्त्यादीनामुपादान-प्रमाणगम्यत्वं संभवति न वेति। तदर्थं चोपादानं नाम किंचन प्रमाणं लोकसिद्धमस्ति नवेति। तत्रानुपपत्तिप्रदेशेष्वर्थापत्तिप्रमाणेनैव तच्छान्तेर्न तल्लोकसिद्धमित्युपादानावगम्योत्पत्त्यादिविचारात्मक-चतुर्थो नारम्भणीय इति पूर्वः पक्षः। द्वारमित्यादौ योग्येतरान्वितद्वारप्रतिपादनमन्तरा अन्वय-प्रतियोगिनं कश्चिन्न निर्वहतीति पिधानाद्यर्थं कल्पयतीति सर्वजनासिद्धम। इदमेव न उपादान-प्रमाणं नाम। तच्चोत्पत्तिशेषत्वानुष्ठानाधिकारान् साधयति। आग्नेयादियागान्वितत्या परमा-पूर्वाभिधानं ह्यनुत्पादितावान्तरव्यापारस्याग्नेयादेः कालान्तरभाविपरमापूर्वसाधनत्वान्वयासम्भवेनो-त्पत्त्यपूर्वं, अपरमापूर्वशेषस्य तदपेक्षितोत्पत्त्यपूर्वार्थत्वासम्भवेन शेषत्वं अननुष्ठितस्याशेषत्वेनानुष्ठानं अनधिकारिणोऽनुष्ठातृत्वासम्भवेनाधिकारं च कल्पयतीत्यौपादानिकलक्षणमारम्भणीयमिति सिद्धान्तः।

ननु श्रुत्यादिशब्दप्रमाणविशेषाः स्थिताः न तेभ्योऽन्यदुपादानं नाम किंचित् सेद्धुमर्हति। द्वारमित्यादावनुपपत्तिशान्तिरर्थापत्तिमानेनैव, तच्च क्लप्रं पीनो न भुङ्क्ते इत्यादौ "दिवा अभुंजानस्य पीनत्वं रात्रिभोजनमन्तरा नोपपद्यत" इति। तत्सिद्धमनयोः फलभेदो नेति। नाप्यनयोरनुपपत्तिशान्त्येकफलयोर्लक्षणभेद इति चेन्न; अभिहितानुपपत्तिशान्तिफलादर्थापत्ति-मानादभिधानुपपत्तिशान्तिफलोपादानमानभेदस्य स्फुटतरत्वात्। एतेन फलभेदलक्षणभेदौ स्त इत्युक्तं भवति। अनयोश्च पीनो न भुङ्क्ते इत्यादिवाक्यमेव तात्पर्यभेदेन उदाहरणम्। पौरुषेय-वचसि प्रयोगभेदेन तात्पर्यं भिद्यते। यदा अहनि भोजननिषेधमात्राभिप्रायेण तद्वाक्यं प्रयुक्तं, तदा "यत्परः शब्दः स शब्दार्थः" इति न्यायान्निषेधमात्रमभिधाय पर्यवसन्नाभिधानम्। अभिहितस्तु निषेधो रात्रिभोजनमन्तरा न पर्यवस्यतीत्यर्थापत्तिप्रमाणेन रात्रिभोजनप्रमितिः। न तत्र तदा शब्दव्यापारतुषोऽपि समस्ति। यदा तदेव वाक्यं रात्रिभोजनपर्यन्ततात्पर्येण प्रयुक्तं, तदा तदुपस्थित्यभावेनापर्यवसन्नाभिधानं, तत्पर्यवसानाय प्रकल्पितार्थाध्याहारं प्रमाणतामश्नुते। अभिधानापर्यवसाने लोकेऽध्याहारः, वेदे उपादानमिति व्यवहारमात्रं भिद्यते।

नन्वेवं लौकिकवचसीव वेदेऽपि तात्पर्यभेदेन कदाचिदर्थापत्तिः, "कदाचिदुपादान-मर्थनिर्णायकं स्यात्" इति चेन्न; अपौरुषेयत्वाद्वेदस्य तात्पर्यभेदाभावात्। ततोऽभिहितयोग्येतर-पदार्थान्वितत्या परमापूर्वाभिधानं येन येन विना न निर्वहति तत्र सर्वत्र शब्दस्यैव तात्पर्यं न्यायात्कल्पनीयम्। तथाहि — व्रीहीन्प्रोक्षतीत्यादिवाक्याभिहितप्रोक्षणाद्यन्वितापूर्वाभिधानं समान-पदोपात्तयागकरणान्वितेऽपूर्वे प्रोक्षणादेः करणत्वमादाय न पर्यवस्यतीति करणोपकारकतामाक्षिपति। तत्सिद्धमुपादानमर्थापत्त्यलब्धप्रयोजनम्।

तदेवं प्रथमद्वितीयचतुर्थाध्यायार्थास्संग्रहेण निरूपिताः ।

अथापूर्वसद्भावे किं प्रमाणम्? न तावद्वेदः, अलौकिके तस्मिन्ननवधृतशक्तिकत्वात् । [1]सापि नश्वरस्य धात्वर्थस्या[2]भिहितकालान्तरभाविफलसाधनत्वान्यथानुपपत्तिः, कल्पितेऽपि तस्मिन् तस्यैवाव्यवहितस्य फलसाधनत्वेनानुपपत्त्यशान्तेः ।

अत्र वदन्ति — अर्थापत्तिरेव प्रमाणम् । न चोक्तदोषः, द्वारतया कल्प्यमानापूर्वस्य द्वारिसाधनताविघटकत्वाभावात् । नहि द्वारत्वेन कल्पितः संस्कारोऽनुभवस्य स्मृतिसाधनताविघटको दृष्ट इति । तन्न, अभिहितान्यथानुपपत्तिर्ह्यर्थापत्तिः । अभिधानञ्च योग्यताज्ञानाधीनं, सा च धात्वर्थे, स फलं प्रति साक्षान् इत्यविवादम् । नाप्यपूर्वकल्पनातः प्राक् तद्द्वारा योग्यता सुज्ञाना, तथा चाभिधानमेव नेति नार्थापत्तिः ।

एवं तर्ह्युपादानिकं भवत्विति चेन्न, अपूर्वाभिधानापर्यवसानरूपोपादानस्यापूर्वमानत्वायोगात् । एवं तर्हि न लोकसिद्धमुपादानं, अपूर्वाभिधानापर्यवसानस्य लोके अभावात् । यदि चाभिधानापर्यवसानमात्रमुपादानं, तर्हि धात्वर्थगतसाधकत्वाभिधानापर्यवसानमपूर्वं गमयतीति नोपादानसिद्धिरपूर्ववाच्यत्वमपेक्षत इति चेन्न; लिङः साधनत्वाशक्तत्वेन तदभिधानस्यैवाभावात् । साधनत्वे अशक्तिः कार्यत्वे च शक्तिरित्येतत्सर्वं विधिविवेके निरूपितम् । ततो वेदेऽपूर्वाभिधानापर्यवसानरूपमुपादानं नापूर्वे मानम्; किन्तु लिङादिरेव । तेन च कार्यत्वेन प्रधानत्वेन चापूर्वमभिधीयते । तदेव च कामीष्टसाधनम् । तस्य कामिकृतिसाध्यत्वाभावे न तदिष्टसाधनम् ।

नन्वेवं "ज्योतिष्टोमेने" त्यादि तृतीयाश्रुतिविरोध इति चेन्न; साधनसाधनतामात्रेणोपपत्तेः । अस्ति च साधनसाधनेऽपि तृतीयाप्रयोगः, घटजनकचक्रभ्रमणजनके दण्डे "दण्डेन घटो जायत" इति । नच "यो ब्राह्मणायापगुरेत्तं शतेन यातया" दित्यादौ दुरितापूर्वस्यापि लिङ्वाच्यत्वापत्तिः, काम्यपूर्वोक्तरीत्या अर्थापत्त्यनवतारादिति वाच्यम्; ज्योतिष्टोमादिकाम्यवाक्ये उक्तरीत्या धात्वर्थावच्छेदेनाव्यवहितसाधनतायां गृहीतायामवगोरणादिवाक्ये अवगोरणादौ तथाभिहिते अभिहितान्यथानुपपत्तिलक्षणार्थापत्तिप्रमाणेन दुरितापूर्वकल्पनोपपत्तेः । नन्वेवमपि "सोमेन यजेते"त्यादौ उत्पत्त्यपूर्वस्य लिङ्वाच्यत्वापत्तिः कालान्तरभाविपरमापूर्वजननायोग्यस्य सोमयागादेस्तत्साधनत्वेनाभिधातुमशक्यतया अभिहितानुपपत्तिलक्षणार्थापत्तिप्रमाणानवतारात् । न चेष्टापत्तिः — प्रधानापूर्वस्यैव लिङ्वाच्यत्वाङ्गीकारेणापसिद्धान्तापातादिति चेन्न; प्राच्योदीच्याङ्गसंबन्धबोधात्प्राक् स्वर्गादिवदपूर्वे कालान्तरभावित्वानिर्णयाद्यागाद्युत्पत्त्युत्तरक्षण एव तस्य जनन-

---

१ नापि इति युक्तम् (सं) २ व्यवहित-इति युक्तम् (सं)

सम्भवाच्च। अत एव "तस्माद्ब्राह्मणाय नापगुरेत" इत्यादा"वपगोरणाभावसङ्कल्पविषयं कार्यं" इत्याद्यर्थबोधके कालान्तरभाव्यपूर्वाङ्गीकारः। तद्वत्काम्यापूर्वस्याप्यपूर्वत्वाविशेषात् सोमयागाद्यनन्तर-भावित्वसम्भावनया सोमयागादौ तत्साधनत्वेनाभिहिते पूर्वोत्तराङ्गपर्यालोचनया तत्सहितस्यैव सोमयागादेः परमापूर्वसाधनत्वं न स्वरूपतः इत्यभिहितसाधनत्वस्य व्यवहितनिष्ठस्योत्पत्त्य-पूर्वमन्तरानुपपत्तेरर्थापत्त्यवतार इति। वस्तुतस्तु पूर्वोत्तराङ्गसहितसोमयागान्विततया परमापूर्वाभिधान-मुत्पत्त्यपूर्वमन्तरा न पर्यवस्यतीत्यभिधानापर्यवसानलक्षणोपादानगम्यमेव तत्। तदेवमुक्तया दुरिता-पूर्वोत्पत्त्यपूर्वयोर्न लिङ्वाच्यत्वं किन्तु परमापूर्वस्यैवेति सिद्धम्।

अथ केचिद्विशेषाः प्रसङ्गान्निरूप्यन्ते

उपकारभेदाभेदयोर्न पदार्थभेदाभेदौ नियामकौ, किन्तूपदेशभेदाभेदौ। व्रीहीन्प्रोक्षति, व्रीहीनवहन्तीत्यादौ व्रीहिरूपपदार्थैक्येऽप्युपदेशभेदात् प्रोक्षणावहननादिभिरुपकारभेददर्शनात्। "बर्हिषि हवींष्यासादयती"त्यादौ हविरासादनमुद्दिश्य बर्हिर्विधायकेऽङ्गहविरासादनं प्रधान-हविरासादनञ्चेति पदार्थभेदेऽपि वाक्यैक्यायापूर्वीयहविरासादनत्वेनैकीकृत्योपकारैक्यप्रतिपादन-दर्शनादित्येको विशेषः।

उपदेशो द्विविधः—प्राकृतो वैकृतश्चेति। तत्राद्यः कुशमयं बर्हिर्भवतीत्यादिबर्हिरादिरूप-पदार्थमुद्दिश्य कुशमयत्वादिविधानार्थः, न तत्कार्यमुद्दिश्य तस्य हविरासादनादिरूपस्य तत्प्रवृत्तिवेलायां अक्लृप्तत्वात्। द्वितीयः शरमयं बर्हिर्भवतीत्यादिः, बर्हिरादिकार्यं प्रकृतौ क्लृप्तं चोदकप्राप्तं बर्हिरादिपदेन लक्षणयानूद्य शरमयत्वादिविधानार्थः। कार्यापेक्षितसाधनविधानार्थत्वात् सर्वेषां विधीनाम्। अस्य त्वपवादः प्रकृतौ कार्यस्याक्लृप्तत्वात्।

ननु हविरासादनाद्युद्दिश्य कथं विधेयं शरमयत्वादि? तस्य शरप्रचुरत्वाभावादिति चेन्न; नित्यं वृद्धशरादिभ्यः इति प्रतिपदशास्त्रविहितविकारार्थमयडन्तत्वाच्छरमयशब्दस्य, शरकार्य-त्वाच्च हविरासादनस्य। नन्वेवमप्येकादशप्रयाजान्यजतीत्यादौ प्रयाजादिशब्देन तत्कार्यमदृष्टमुद्दिश्य विधीयमान एकादशत्वादिगुणः कथं कार्यान्वयी स्यात्? नहि संख्या अदृष्टं जनयति। नन्वरुणिमा क्रयार्थत्वेन विधीयमानः क्रयमजनयन् कथं क्रयान्वयी स्यात्? अरुणिमावच्छिन्नगवा क्रयो जायत इति तदन्वयनिर्वाहश्चेत्, संख्यावच्छिन्नप्रयाजैरदृष्टं जायत इति संख्याकार्ययोरन्वय-निर्वाह इति तुल्यम्। अयञ्चान्यो विशेषः।

ननु गोबलीवर्दन्यायस्य किं प्रयोजनम्? यदि सामान्यविशेषयोरुभयोश्श्रवणे विशेष-

व्यतिरिक्तार्थकत्वं सामान्यशब्दस्येति प्रतिपादनं, हन्त तर्ह्यनुमत्यादीष्टिपशुसोमयागदर्वीहोमरूप-चतुर्विधयागविशेषातिरिक्तार्थो राजसूयशब्दः स्यादित्येतेषां राजसूयनामागृहीतानां स्वाराज्यसम्बन्धा-सिद्ध्या प्राधान्यं न सिद्ध्येत्; सामान्यविशेषन्यायश्च वैयर्थ्यमापद्येत अनेनैव न्यायेन यदाहवनीये जुहोतीत्यादेः बाधकेन पदहोमादिविशेषव्यतिरिक्तार्थतासिद्धेः। तस्माद्वक्तव्यं गोबलीवर्दसामान्य-विशेषन्याययोरसाङ्कर्यं परिहर्तव्यश्च बाधकं राजसूयादिवाक्ये।

उच्यते— विशेषान्तरविरहलक्षणबाधकरहितः सामान्यविशेषयोः सन्निधिर्यत्र, तत्र गोबलीवर्दन्यायः। यथा ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेति। अस्त्यत्र कौण्डिन्यरूप-विशेषब्राह्मणसामान्ययोः सन्निधिः कौण्डिन्यव्यतिरिक्तब्राह्मणविशेषसत्त्वेन बाधकरहितः। पद-वाक्याहवनीयवाक्ययोरसंनिहितयोर्नैतन्न्यायावकाशः। अनुमत्यादिविशेषव्यतिरिक्तविशेषान्तरा भावेन बाधकेन राजसूयशब्दः प्रकृतविशेषेषूपसंह्रियत इति उपसंहारन्यायस्यापि न काचिद्धानिः।

अथ गुणकामविषयाणां श्रूयमाणाश्रूयमाणयजीनामुत्पत्तिविषयाणामारादुपकारिसान्नि-पत्योपकारियागविशेषाणाञ्च शास्त्राणां क्रमेणार्था निरूप्यन्ते।

गुरुर्हि शाबरभाष्यस्य वस्तुबलमनुसृत्य विवरणाख्यां लघुटीकां निर्माय, पुनः शब्दबल-मनुसृत्य निबन्धनाख्यां बृहट्टीकां समचैषीत्। तत्र शब्दबलवादिमते "दध्नेन्द्रियकामस्य"त्यादि-गुणकामशास्त्रेषु नियोगान्तरं, अग्निहोत्रं जुहोतीति शास्त्रार्थनियोगानुबन्धात् केवलहोमाद्दध्याद्यनुरक्त-होमस्यानुबन्धस्य शब्दाद्भेदप्रतीतेः; अनुबन्धभेदेन च नियोगभेदस्याविपादात्। तथा चायमर्थः "दध्यनुरक्तहोमविषयकमिन्द्रियकामस्य कार्यं" इति। वस्तुबलवादिमते तु— क्रियैवानुबन्धः, तस्या एव साध्यत्वात्। साध्यस्यैव च कृत्युद्देश्यापूर्वं प्रति कृतिद्वारा विषयत्वात्। सा च क्रिया "अग्निहोत्रं जुहोति" "दध्नेन्द्रियकामस्य जुहोति" इति वाक्ययोर्न भिद्यते। अतोऽनुबन्धभेदा-भावान्न शास्त्रभेद इति न नियोगभेदः।

नच मतद्वयेऽपि दध्नः आश्रयसम्बन्धः फलसम्बन्धश्चेति सम्बन्धद्वयबोधने वाक्य-भेदापत्तिः, परमत इव होमदध्नोः क्रियाकारकरूपाश्रयाश्रयिभावसम्बन्धस्य लोकसिद्धत्वादिति। यत्र यागादिरूपक्रिया श्रुता उपांशुयाजमन्तरा यजतीत्यादौ तत्र सानुबन्धः यागादिविषयकं कार्यमित्यपि। एवं यत्र कुत्र द्रव्यदेवतासम्बन्धः श्रुतः यागश्च त्यागात्मा तेनानुमीयते, "यदाग्नेयो-ऽष्टाकपाल" इत्यादौ तत्र स एवानुबन्धः द्रव्यदेवतासम्बन्धविषयकं कार्यमिति। स्वतस्तस्य कृत्यसाध्यत्वेऽप्यनुमितयागद्वारा तत्साध्यत्वादिति।

शब्दबलमते यागदानादिरूपा क्रियैवानुबन्धः। सर्वत्र स्वतः कृतिसाध्यायास्तस्याः कृत्युद्देश्यापूर्वं प्रति तदवच्छेदकीभूतकृत्यवच्छेदकतया विषयत्वार्हत्वात्। सा च क्वचिच्छ्रुता क्वचिदनुमितेति वस्तुबलमत इति।

सोमेन यजेतेत्याद्युत्पत्तिशास्त्राणां सोमादिना यागः कर्तव्य इत्येवार्थः। नतु मत्वर्थलक्षणया सोमवद्यागविषयकं कार्यमिति। [1]परमापूर्वानुवादशङ्काङ्कुरितशक्तिकविधिप्रत्ययेन कार्यप्रतीतेः। तत्प्रतीतौ हि उपपदार्थस्य वैयधिकरण्येनान्वये, धात्वर्थः कार्यसाधनं उपपदार्थश्च धात्वर्थसाधनं इति बोधने आवृत्तिप्रसङ्गात् सामानाधिकरण्येनान्वयसिद्धये मत्वर्थलक्षणाश्रयणीया स्यात्। पश्चादभिहितसोमलतादिसाधनकयागे ग्राहकग्रहणप्रमाणेन परमापूर्वान्विते उत्पत्त्यपूर्वं विना तदन्वयो न पर्यवस्यतीति उपादानप्रमाणकल्प्यमुत्पत्त्यपूर्वं सोमेन यजेतेत्यादिशास्त्रार्थः। विधिप्रत्ययः प्रधानापूर्वशक्तस्तदाक्रान्तविषयकत्वेन उपसर्जनं लक्षणया प्रतिपादयति; सोमादिसाधनकयागविषयकं कार्यमिति। नचादौ सोमादिना यागः कर्तव्य इति प्रतिपाद्य निवृत्तव्यापारं पश्चात्सोमादिसाधनयागविषयकं कार्यमिति प्रतिपादयतीत्यभ्युपगमे विरम्य व्यापारप्रसङ्ग इति वाच्यम्; दशाभेदेनाविरोधात्। अभ्युपगच्छन्ति हि सर्वे मीमांसकाः समिदादिशास्त्राण्यवान्तरवाक्यविधया स्वं स्वमर्थं प्रतिपाद्य निवृत्तव्यापाराणि पश्चात्प्रधानाकाङ्क्षया तदेकवाक्यतां प्राप्य तदन्वितस्वस्वार्थप्रतिपादकानीति।

ननूत्पत्तिवाक्ये चेन्न मत्वर्थलक्षणा, अभ्यासनये "समिदादिशब्दानां गुणपरत्वे मत्वर्थलक्षणा स्यात्" इति दूषणं पूर्वपक्षिणं प्रति सिद्धान्तिनोक्तं असमञ्जसं स्यादिति चेन्न; द्वितीयान्तत्वेन समिदादिशब्दानां तद्दूषणसामञ्जस्यात्। समिधो यजतीत्यादिवाक्येषु हि समिदादिशब्दानां गुणपरत्वमिति पूर्वपक्षे "समिद्वन्तं यागं कुर्यात्" इत्यर्थः। यागस्य समिदादिरूपत्वाभावेन सामानाधिकरण्येनान्वयासंभवात्। अपिच, समिधः इत्यादिद्वितीया स्रुक्संमार्गनयेन साध्यत्वबोधिका, यजतीत्यपिपदं परमापूर्वानुवादशङ्काकुण्ठितप्रत्ययं यागं कुर्यादिति तत्साध्यत्वबोधकम्, नच साध्ययोः परस्परसम्बन्धसम्भवः यथा क्रियाकारकयोः। तथा चोत्पत्तिवाक्येऽपि द्वितीयान्तस्य पदस्य मत्वर्थलक्षणास्तीति स्थितम्। समिधो यजतीत्यादीन्यारादुपकारिशास्त्राणि व्रीहीन् प्रोक्षतीत्यादीनि संनिपातिशास्त्राणि च परमापूर्वानुवादशङ्काकुण्ठितशक्तिकविधिप्रत्ययानि लौकिकवाक्यानीवेतरान्वितस्वार्थमभिदधति। अभिहितप्राकारणिकसकलपदार्थैः प्राकरणिकपदार्थाः प्रयोजनिनः परमापूर्वं प्रयोजनमिति प्रयोजनप्रयोजनिभावसम्बन्धेनान्विततया परमापूर्वमधिकारवाक्यस्थो लिङादिग्राहकः प्रतिपादयति गृह्णातीति ग्राहकग्रहणप्रमाणेन प्राकरणिकसकलपदार्थानामपूर्वसमर्थ्यसिद्धिः। तन्निर्वाहस्तु समानपदोपात्तधात्वर्थकरणावरुद्धत्वेन अपूर्वस्य स्वकरणार्थ-

---

1 "परमापूर्वानुवादशंकाकुण्ठितशक्तिकविधिप्रत्ययेन कार्यप्रतीतेः" इति स्यात्। (स)

सह भ्राता ज्ञाता सहजविनयैस्सर्वतनयैः
सहोदारैर्दारैस्सहसचिवबन्धुप्रभृतिभिः ।
सुतुङ्गैर्मातङ्गैरपि रथहयैः श्रीतिरुमल-
क्षितीशो धीशोभी निरवधि चिरायुर्विजयताम् ॥ १२ ॥

—— * ——

नवरात्रमहोत्सवामध्ये महाराजराजेश्री यजमानसाहेबांवरि केलते श्लोकः

प्रासादे पाण्डरिम्णा परिहसति सभां पाकविद्वेषिणस्तां
हैमे सिंहासनेऽस्मिन् तिरुमलधरणीधूर्वहो दीप्तमूर्तिः ।
पश्यन् संगीतगोष्ठीं भरतमतमहासारसीसारसीमां
तुल्यालाभोत्थवाच्यं व्यपनयति पुरोदर्पणालंबिबिम्बः ॥ १ ॥

शुभनटनारंभा सा नटी च हूहूस्स्वतो महान् गाता ।
जिष्णुः प्रभुस्सुमनसः सभ्याः ख्याता सभा सुधर्मेति ॥ २ ॥

आरणिनगरीगोप्ता तिरुमलरायः प्रभुश्चिरं जयति ।
यद्भक्तिविस्मितात्मा श्रीमान्रामोऽपि चित्रलिखितोऽभूत् ॥ ३ ॥

सौधं सूर्येन्दुरोधं निजसुभगतया वैजयन्तं जयन्तं
दीपैर्देदीप्यमानं स्फटिकमणिमयैर्भाजनैर्भासमानैः ।

भास्वत्सौवर्णसिंहासनमखिलदिशादर्शसंदर्शनीयम्
श्रीमान् श्रीशैलरायः प्रभुरधिवसतादाशतं हायनानाम् ॥ ४ ॥

कति कति सन्ति स्वच्छा जाने नादर्शसन्निभं कमपि ।
स्वाभिमुखं प्रभुतिलकं यस्मादस्माकमभिमुखीकुरुते ॥ ५ ॥

भाति स्वात्मनि यद्यत्तन्मुकुरोऽसौ परेषु दर्शयति ।
स्वच्छाः स्वात्मनि भातं नहीतरेषां स्वयं तिरोदधते ॥ ६ ॥

प्रभोस्सेवां का वा नभसि शतमन्योरविरतं
विधातुं शक्नोतीत्यवनिमुपयाता सविबुधा ।
सुधर्मेयं प्रायः प्रसदनमयश्रीतिरुमल-
क्षमाभर्तुस्सेवां वहति सहरंभाप्रभृतिभिः ॥ ७ ॥

धाम्नोन्नत्या च चन्द्राद्यतिशयिनि महावैभवे तिर्मलश्री-
रायक्षोणीन्द्रसौधे सदसि बहुविधान् रागवर्गप्रचारान् ।
लास्यादौ तान्विशेषाननिशमितचरान्तूर्णमाकर्णयद्भि-
स्सोद्ग्रीवैस्सर्वदेवैरुपरि परतरस्वर्गसत्तान्वमायि ॥ ८ ॥

सौधोऽयं चन्द्रशालाशिखरगतमहाकेतुदण्डाग्रभिन्नात्
पूर्णादिन्दोस्स्रवद्भिर्धवलतरसुधासारनिष्यन्दपूरैः ।
शश्वद्भिष्वक्पतद्भिः स्वयमपि जगृहे निस्समं पाण्डिमानं
चन्द्रे पीयूषहीनस्थलमपि बहुशोऽतद्विदस्तर्कयन्ति ॥ ९ ॥

सौधेऽस्मिन् स्पृहणीयनाट्यविभवव्यालोककौतूहलात्
किंनाकादवरोहतीह सहसा साक्षात्सहस्रेक्षणः ? ।
शंकामंकुरयन्निति स्वयमसौ श्रीतिर्मलक्ष्मापतिः
सौधाग्रादवरुह्य गुह्यकसभां रंगस्थलीमाययौ ॥ १० ॥

यस्या लास्यविलोकनाय मघवानासीत्सहस्रेक्षणः
सा रंभा तमुपेक्ष्य तिर्मलमहीभर्तुस्सभां भेजुषी ।
नृत्ये संप्रति विप्रलम्भरसविन्यासाभिनीतिच्छलात्
खेदं सूचयतीदृशप्रियतमालाभोदितं हृद्गतम् ॥ ११ ॥

स्फाटिकभाजनलग्ना दीपा अपि नाट्यचातुरीमेताम् ।
दृष्ट्वा विस्मयमाना निश्चलभावं प्रपेदिरे नियतम् ॥ १२ ॥

दीपावली दिवसी केलेल श्लोकः

दीपावलीनाममहोत्सवेऽस्मिन्वेदेषु लोकेषु विशुद्धधीभिः ।
सभ्यैरलभ्यैरलमक्रियन्त सभाश्शुभास्तिर्मलभूमिभर्तुः ॥ १ ॥

अभ्यञ्जितैः पूजितसद्गुणौघैः विद्यानिषद्यायितहृद्यवाग्भिः ।
सद्भिस्सभासद्भिरभूष्यतेदं श्रीतिर्मलक्ष्मापसभं शुभंयु ॥ २ ॥

प्रौढैस्सभायां विबुधैस्सभायां सहोदरेणैव सहोपविष्टः ।
श्रीमानसौ तिर्मलभूसुरेन्द्रस्सोपेन्द्रमिन्द्रं त्रपयांबभूव ॥ ३ ॥

श्रीमत्तिर्मलभूपतेस्तुनगरी सर्वा सुधर्माधिका
निस्संख्याः कवयो बुधास्सुधिषणास्सर्वे सभास्थायिनः ।
पुत्राश्चापि जयन्त इत्यभिहितास्तुंगास्तुरंगागजाः
पद्मैकोदरपद्मिसैंधववरौ लज्जार्णवेऽमज्जयन् ॥ ४ ॥

विद्याविद्यावदुर्वीपतिमकुटतटालंक्रियानूत्नरत्नम्
सद्योऽसद्योगदूरीकरणनिपुणधीरद्भुतौदार्यशीलः ।
मायामायासयित्रीं विमतविरचितां तत्क्षणान्निह्नुवानः
सत्रासत्राणकारी जयति तिरुमलक्षोणिगीर्वाणराजः ॥ ५ ॥

प्रतीतप्रज्ञाढ्याः प्रगुणसुगुणं पण्डितवरं
प्रभुं मार्गं मार्गं तिरुमलविभोः कोऽपि न समः ।
न दृष्टस्तेजस्वी निखिलजगदाह्लादनचणः
परः पूर्णादिन्दोरधिकविपुलेऽप्यंबरतले ॥ ६ ॥

धत्ते श्रियं विशदवर्णतनुं च वाचं
वक्त्रे बिभर्ति वहते महतीं च शक्तिम् ।
पीतांबरोऽपि च शिवो दृढसत्यनिष्ठः
श्रीतिर्मलप्रभुरसौ सदृशस्त्रयाणाम् ॥ ७ ॥

अजस्रमंगीकृतसर्वमङ्गलं स्फुरन्महासेनमहीनभूषणम् ।
प्रशस्तवेतंडमुखोपलालितं शंके शिवं तिर्मलमेदिनीश्वरम् ॥ ८ ॥

कला विशुद्धस्सकला दधानमशेषभूषारचितात्मभासम् ।
मुखेऽपि चात्रीक्षणजातशोभं श्रीतिर्मलक्ष्मापमनुग्रमाहुः ॥ ९ ॥

काठिन्यं कामिनीनां कुचकलशयुगे चापलं चारुनेत्रे
कौटिल्यश्चालकेषु द्विजनिवहतिरस्कारिता चाधरेषु ।
भ्रूभंगे चापवादो मणिषु मुखरता शून्यवादोऽपि मध्ये
सादृश्यं ते पुरेऽस्मिन्न खलु गुणनिधौ तिर्मलक्ष्माभृदिन्दौ ॥ १० ॥

न केवलं तिर्मलरायराजः श्रुत्यन्तगामी नयने च तस्य ।
असौ परं न द्विजराजशोभां मुखारविन्दश्च दधाति तस्य ॥ ११ ॥

——*——

श्रीविलासास पाहून् शेषत्वादिकरून
उत्प्रेक्षिलते श्लोक

प्रासादं श्रीविलासं तिरुमलनृपतेः प्राप्तकैलासलीलं
भित्त्वेमां भूतधात्रीमुपरि सुषिरतस्सत्वरोद्गत्वरस्य ।
भर्तुश्चक्षुःश्रुतीनां फणमतिविततं भावये तद्गतंसान्
दीपान्माणिक्यरूपानभ्रजलधरं श्रीधरं चातिनीलम् ॥

——*——

प्रमोदसंवत्सरदसरादिवसीं यजमानसाहेबांवरि
केलते श्लोक

श्रीहयग्रीवाय नमः

प्रमोदे वत्सेऽस्मिन् तिरुमलविभौ दैत्यदमन-
प्रसादप्राग्भारः प्रतिदिवसभव्योत्सवगणान् ।
वितन्वन्नन्वन्तःप्रमदविसरोदन्वतपयः-
परीवाहाकाराच्च सृजति जनहार्षाश्रवझरान् ॥ १ ॥

सर्वं वत्समिव प्रमोदयति यो लोकं सुराजा स इ-
त्यार्याणां वचनं द्विधा सफलयन्नस्मिन् पुनर्वत्सरे ।
धत्तेसौ बहुरक्षणक्रमधुरां श्रीतिर्मलक्ष्मापतिः
किं राज्ञो बहुमन्महे नहि वयं कृत्यादराज्ञः परान् ॥ २ ॥

प्रमोदवत्सेऽत्र सहप्रमोदवत्सस्स्वयं तिर्मलभूमिपालः ।
आरुह्य हस्तीन्द्रमलंकरोति वीथीस्समस्ता विविधैर्विलासैः ॥ ३ ॥

प्रमोदवर्षोऽब्दतया महेऽस्मिन् प्रमोदवर्षं तनुते मनस्सु ।
अनेकपस्तिर्मलभूमिपालोऽप्यनेकपं यानमुपैति युक्तम् ॥ ४ ॥

चञ्चद्वेत्रलतानिवारितजनव्यालोलवीथीतलं
विष्वग्भासुरगन्धदीपनिकरव्यक्ताखिलाशामुखम् ।
नृत्यद्वारवधूविलोकनकलाकौतूहलोदित्वर-
स्पर्धादुर्धरयौवनं पुरमिदं विद्योततेऽस्मिन्क्षणे ॥ ५ ॥

महोमह्यां मह्यो विजयदशमीवैभवकरो
नरोदग्रानन्दप्रसरणवदान्यो जनिमताम् ।
असामान्यो मान्योऽनघतिरुमलक्ष्मावलरिपो-
रसौ वर्षेवर्षे निरवधि परामृद्धिमयताम् ॥ ६ ॥

आस्थाने भद्रपीठीं कनकमयमहामण्टपेऽन्तःस्फुरन्ती-
मारुह्यासीनमासेचनकमिह दृशां मादृशामाभिरूप्यात् ।
कोटीरन्युप्तरत्नद्युतिनिकरदिवाभूतदोषाविभागं
भूषाभूषायमाणं तिरुमलनृपतिं साधु पश्यन्ति धन्याः ॥ ७ ॥

आस्थाने राजमाने तिरुमलनृपतौ पार्श्वयोर्दीपिकानां
प्रौढिम्नः ख्यापिकानां स्फटिकमणिमये भाजने भासुराणाम् ।
नृत्यद्वारांगनानामभिनयपटिमालोकहर्षप्रकर्ष-
स्तब्धानां तेजसैव त्रिभुवनमखिलं दृश्यते निस्तमस्कम् ॥ ८ ॥

आसीने भद्रपीठे तिरुमलनृपतावेकतोऽनेकतन्त्रा-
भिज्ञाविज्ञाः परत्राधिसभमधिकृताः कंचुकोष्णीषवेषाः ।
राज्ञो मुद्रां दधाना विदधति पुरतस्सेवकादेव कार्यम्
ग्रामीणा वाणिनीनामनवगतचरान्नाट्यतो विस्मयन्ते ॥ ९ ॥

राजालंकृतिभासुरो रतिपतेर्नव्यावतारान्तरं
राजत्कुण्डलशोभिगंडयुगलो राजीवरम्येक्षणः ।
राकाशीतकरावमाकरमुखज्योत्स्नायमानस्मितो
राजत्वेष महोत्सवे तिरुमलश्रीरायराजश्चिरम् ॥ १० ॥

उपनयनविवाहोत्सवकाले इष्टदेवताप्रार्थनपुण्याहवाचनाद्यारंभादिविषयकाः श्लोकाः लिख्यन्ते

मंथीभूतावनीध्रभ्रमणजवसमुद्भूतरंगत्तरंगा-
दुत्संगाद्दुग्धसिंधोस्तरलतरदृशां पश्यतां दैवतानाम् ।
आविर्भूयातिभूयस्स्मितसुभगमुखी संमुखीभूयजिष्णौ
विष्णौ श्रीवेंकटेशे विवृतनिजमनाः श्रीस्सदा सन्निधत्ताम् ॥ १ ॥

उदयशिखरिप्रान्तप्रोद्यत्पतंगमहश्छटा-
प्रसरविकसत्पद्मच्छायाप्रभावपुषा दृशा ।
सहजकरुणासाराकारामलामृतवीचिका
शिशिरवपुषा योषा शेषाचलेशितुरीक्षताम् ॥ २ ॥

श्रीवेंकटेशरमणी रमणीयगुणारमा ।
असदृक्षैः कटाक्षैर्वः स्थूललक्षैस्समीक्षताम् ॥ ३ ॥

करिष्यमाणेषु महोत्सवेषु निर्विघ्नतासिद्धिसमृद्धिहेतुः ।
श्रीमान्गणानामधिपो गजास्यस्सुपूजितोऽनुग्रहमातनोति ॥ ४ ॥

शुभमहोत्सवसंभृतसंभ्रमैः श्रुतिवचोमयमंगलवाग्भरैः ।
सुमनसां प्रवरैरनुगृह्यतां सहकुटुंबकतिर्मलभूपतिः ॥ ५ ॥

पुण्याहघोषैश्च पुरोहितानां सौवस्तिकानां वचसां प्रचारैः ।
तूर्यत्रिकाणां प्रचुरैः प्रणादैस्त्रैलोक्यमालोकयत शब्दरूपम् ॥ ६ ॥

आराधितानामिह देवतानामनुग्रहैरीप्सितदानशौण्डैः ।
आशीर्भिराचार्यमुखोद्गताभिर्विराजते मांगलिकोपनीतिः ॥ ७ ॥

नांदीमंगलसन्निधापिततमास्सर्वे सुपर्वेडिता
 लक्ष्मीवेंकटशैलनायकमुखा देवा मुदे वाञ्छिताः ।
मन्त्रैस्संस्तुतमूर्तयोऽर्चिततरास्सारोपचारोत्करै-
 स्तान्यासुस्सकुटुंबके तिरुमल्ले राये चिरायेप्सितम् ॥ ८ ॥

त्वयन्तस्वान्तकान्तान्तरधरणिसुरश्रेष्ठगोष्ठीमुखाब्ज-
 प्रत्युद्यद्वेदमन्त्रप्रणुतदिविषदां जाग्रतानुग्रहेण ।
आद्यः श्रीशैलरायप्रभुवरतनयः श्रीनिवासाख्यरायो
 वेत्रा पित्रोपनिन्ये निगमनिगदितां पद्धतिं शुद्धयित्वा ॥ ९ ॥

उपनयने श्रुतिनयने सूनोः प्रथमस्य तिर्मलमहीपः ।
अभ्यर्च्यते सदारोमांगलिकैरक्षतैर्महीदेवैः ॥ १० ॥

सुमङ्गलीरियमिति यत्त्रयीवचः पुरोधसा प्रणिजगदे व्रताशिषि ।
सतिर्मलप्रभुसहधर्मचारिणीमिहोचितं न यदि कथं निरीक्षताम् ॥ ११ ॥

श्रीरुक्मिणीसहचरो वसुदेवसूनुः प्रद्युम्नदेवमभिजातमिवोपनिन्ये ।
श्रीमानसौ तिरुमलक्षितिपालमौलिः पत्न्या समं स्वतनयावनुरूपरूपौ ॥१२॥

महर्षयस्ते ददृशुस्सहस्रं व्रतोत्सवं राजकुमारकाणाम् ।
अस्मादृशैर्भूमिसुपर्वराजकुमारकाणामधुना व्यलोकि ॥ १३ ॥

तद्ब्रह्मवर्चसमदृश्यत चारुदृश्ये
वट्वोर्मुखे सवितृदैवतमन्त्रलाभात् ।
साहस्रभानवमयूखगणानुषंगात्
तेजो यथा सकलशीतगभस्तिबिम्बे ॥ १४ ॥

प्रादक्षिण्यक्रमेण प्रविचलविपुलज्वालमालाकलापै-
राज्यैः प्राज्यैस्समिद्धैरुपनयनमहे तिर्मलोर्वीशसून्वोः ।
नृत्यन् किं श्लाघतेऽसौ द्विजमुखरमुखोद्गत्वरोदारवेद-
ध्वानान्नानाप्रकारानभिमतविबुधानुग्रहानप्युदग्रान् ॥ १५ ॥

उपनयमहे मांगल्येऽस्मिन्महीसुरपुंगवा-
ननविसृमरप्रोद्दामाशीर्वितानकृतान्वयान् ।
मधुरिपुमहाघण्टानादान्सदा शुभदायिनो
वटुबहुविधक्षेमोदर्कानसंशयि तर्कये ॥ १६ ॥

सूपैर्गोधूमपूपैरतिसुरभिघृतह्लादिनीनामनूपै-
रन्नैर्देवोपपन्नैरुचितरसभिदाव्यंजनैर्व्यंजनैश्च ।
क्षीरैस्सारैरनीरैर्दधिभिरमथितैस्तर्पितस्तिर्मलेन्दोः
पंक्तौ भूमीसुरौघः स्मरति मुनिवरं तस्य कूटस्थमेव ॥ १७ ॥

भक्षान्प्राप्याद्यकक्ष्यानधिकसुरभिळान् जृंभितघ्राणलोभान्
भूयश्शोभान्रसज्ञाद्रवणचणमहामाधुरीसाधुरीतीन् ।
पैशुन्यान्मान्यमानान्तिरुमलधरणीपालवादान्यकस्य
प्राभ्यस्य प्रत्यवस्यन् श्रुतिविदपि जनो निन्दति ब्रह्मसौख्यम् ॥ १८ ॥

अधरचलनमात्रादाशयं तावकीनं
कतिचिदतिसमर्था वेदितुं शक्नुवन्ति ।
वयमिह कथितार्थाञ्शक्नुमो नैव वेत्तुं
क्वचन भवति पुण्यात्पुंसि लालाटिकत्वम् ॥ १९ ॥

बलिपुष्टः पुल्टकारिर्नाडिजङ्घो प्रभृष्टकः ।
धूलिजङ्घोन्यवापश्च परभृद्वायसोऽन्यपुः ॥ २९५ ॥

व्याघ्राटस्तु भरद्वाजः क्षिप्रश्श्येनस्सपर्णिकः ।
वाचालमुखराशारिकोयष्टिश्शेखरीति च ॥ २९६ ॥

कुलटः कुक्कुटो गर्तकुक्कुटः पेचिका पुनः ।
उलूकः पेचकः कुण्डः काकारिर्हरिलोचनः ॥ २९७ ॥

खञ्जनः खञ्जरीटः स्यान्मिथुनो वसुदग्विधुः ।
श्रीमान्त्रिकेतुर्मेधावी शुकस्त्वलिफलाशनः ॥ २९८ ॥

दरणो रजकश्चेति कोकिलः पिक इत्यपि ।
वसन्तकर्णी मधुवान् कालकण्ठो वनप्रियः ॥ २९९ ॥

भृङ्गः कलिङ्गो धूम्याटो राजहंसस्तु बुद्धिमान् ।
किकिर्दिविः स्वर्णचूडः चषो राजविहङ्गमः ॥ ३०० ॥

गृध्रस्तु पुरुषव्याघ्रो दूरदर्शी सुदर्शनः ।
शशादनो वर्तुलाक्षः श्येनोऽपि च निगद्यते ॥ ३०१ ॥

सारसे शतपत्रः स्याल्लक्ष्मणा सारसप्रिया ।
चकोरस्तु चलचञ्चुः कपिबश्चन्द्रिकाप्रियः ॥ ३०२ ॥

मयूरो बर्हिणो बर्हीं चित्रपत्रस्तु चन्द्रकी ।
वर्षामतिर्भुजङ्गारिश्श्यापटिश्चित्रपिङ्गलः ॥ ३०३ ॥

शब्दोस्य केका बर्हस्तु प्रचलापकलापकौ ।
अलिर्द्विरेफो लम्बोभसवः पुष्पलोलुपः ॥ ३०४ ॥

मधुकरश्चञ्चरीको सारङ्गस्तु शिलीमुखः ।
हिन्दोलो गन्धिलावासः कुसुमातिथिरीर्यते ।
पतङ्गश्शालभे तु स्याद्दंशस्तु वनमक्षिका ॥ ३०५ ॥

इति बालप्रबोधिकायां चतुर्दश उपदेशः ॥

सिंहो मृगेन्द्रः पञ्चास्यः पारीन्द्रः श्वेतपिङ्गलः ।
व्याकीर्णास्यो महानादो मृगपः केसरी हरिः ॥ ३०६ ॥

व्याघ्रो मृगारिश्शार्दूलो हिंसारुश्चन्द्रकी मृगात् ।
चित्राङ्गस्तु महादंष्ट्रः पिण्डारस्तु न रोटकः ॥ ३०७ ॥

सूकरो वज्रदंष्ट्रश्च वराहश्च जलप्रियः ।
आमरूपी स्तब्धरोमा पीनस्कन्धोलसेक्षणः ॥ ३०८ ॥

भल्लूके दीर्घरोमा स्याद्भल्लूवासस्सिताननः ।
गण्डके खड्गपादः स्यात् कोके त्वीहायनो वृकः ॥ ३०९ ॥

महिषी तु चिरस्कन्धो ... न्तस्तु रजस्वलः ।
निरञ्जनः कृष्णसारो पृषतस्तु सबिन्दुकः ॥ ३१० ॥

वातायुः स्याद्वातमृगे प्रियको रोमभिर्युतः ।
शम्याकः श्वेतबिन्दुः स्यात्कदली तु बिलेशयः ॥ ३११ ॥

शालिजातस्तु खश्वासः पूतिकश्चासिकोऽपि च ।
शिवेबः स्याद्गन्धमृगः कस्तूरी मृगवालुका ॥ ३१२ ॥

अण्डस्तु तस्य कस्तूरी- राजार्हं शिविचन्दनम् ।
मार्जारिकावेधमुख्या मदनी गन्धचेलिका ॥ ३१३ ॥

मृगमत्तः स्वभीरुःस्याज्जम्बुको ग्रन्थिलोऽपि च
वानरो मर्कटःकीशः कुरङ्गो भल्लुकोलिगुः ॥ ३१४ ॥

महावेगो दधिमुखश्शाखामृगश्चलीमुखो ।
श्वा सारमेयश्शुनको भषको मृगदशकः ॥ ३१५ ॥

रतिकीलो गृहमृगः कुक्कुरः क्रोष्टुकश्शानिः ।
पक्ष इन्द्रमृगःश्वालः कपिलो मण्डलश्शुनः ॥ ३१६ ॥

जिह्वापानः पुरोगामी कृतज्ञो रात्रिजागरः ।
शुनी तु सरमा श्वालिविचरो ग्रामसूकरः ॥ ३१७ ॥

रासभस्तु खरोऽनश्वो धूमकण्ठो महास्वनः ।
रामुकोश्चिरमेधी च कामिनी चक्रकन्धरः ॥ ३१८ ॥

नदभोगर्दभश्चापि ... ... ।
मयस्तूष्ट्रोमवाग्रीवो वक्राङ्गः पार्वतीप्रियः ॥ ३१९ ॥

करभस्तस्य शिशुके करभा तूष्ट्रिका नदी ।
हयस्तुरङ्गस्तुरगो प्रोथिवारिप्रकीर्णकः ॥ ३२० ॥

तुरङ्गमश्शालिहोत्री कुतुरस्तक्ष्यकस्तथा ।
मेटकः क्रमणो भोगी पाकलो गृहभोजनः ॥ ३२१ ॥

माषाशी महिषद्वेषी पुरुषस्सिंहविक्रमः ।
दन्तावलः कुञ्जरश्च महाकायस्तु वारणः ॥ ३२२ ॥

मतङ्गजो मतङ्गः स्यात्कुम्भी दन्ती करी दरी ।
वैतण्डो भिन्नगण्डस्तु सामजस्सिन्धुरस्सुरः ॥ ३२३ ॥

करेणुका करिण्यां स्याद्वमथुः करशीकरः ।
सौरभेयी भृङ्गिणी गौश्शुभार्धा लम्बिका मही ॥ ३२४ ॥

माहेयी वञ्जुला तम्पा रोहिणी वृषवल्लभा ।
वृषस्तु वृषभश्शृङ्गी वाहो गोरक्षधूर्तिलः ॥ ३२५ ॥

उक्षा गौर्वृषलोऽनड्वान्वाह्यः स्कन्धवहो वसी ।
गोमहिष्यादिकं जीवधनं स्यात्पादबन्धनम् ।
छागो रङ्गस्तु छगणो लम्बकर्णः स्तबः पशुः ॥ ३२६ ॥

इति बालप्रबोधिकायां पञ्चदशोपदेशः ॥

मनुष्या मानवा मर्त्याः पुरुषाः पूरुषा नराः ।
प्रातः पञ्चजनो गोधा द्विपादो नहुषो नरः ॥ ३२७ ॥

ब्राह्मणस्त्वग्रवर्णश्च विप्रो मन्त्रमुखोऽपि च ।
क्षत्रियो बाहुजो राजा भूमीशश्च निगद्यते ॥ ३२८ ॥

वैश्ये त्वर्यो गोमतिश्च शूद्रः पादभवः स्मृतः ।
जातिमात्रोपजीवस्तु यस्स स्याद्ब्राह्मणब्रुवः ॥ ३२९ ॥

अजपस्त्वसदध्येता देवाजीवस्तु देवलः ।
अधायवो बातरतो विगिताख्यातगर्हणः ॥ ३३० ॥

अवगीताश्च हन्ता तु गुरूणां नरकीलकः ।
शिखिदानो दुराचारः निषिद्धैकरुचिः स्वरुः ॥ ३३१ ॥

त्यक्तात्मा त्यक्तसन्धानोऽवकीर्णस्तु क्षतव्रतः ।
शाखारण्डोऽन्यशाखस्तु वधानी तु स्वशाखिकः ॥ ३३२ ॥

सुधीर्विपश्चित्संख्यावान्प्राज्ञो धीमान्विचक्षणः ।
विद्वान् सन्कोविदः सूरिः मेधावी पण्डितो बुधः ॥ ३३३ ॥

वैहानिकः केलिसखः केलिकीलश्च कथ्यते ।
केलीसहायवासन्तौ सामन्तो राजसंस्तुतः ॥ ३३४ ॥

अभिहारस्त्वभिचरः सहायोऽनुप्लवोऽनुगः ।
क्षुद्रोपकरणे चास्य अध्यक्षः पारिकर्मिकः ॥ ३३५ ॥

कुमाट्रमान्त्रिको मन्त्रिवर्गोऽमात्योथ धार्मिकः ।
भटे विकर्मको धुर्यो चौरिकोदण्डपाणिकः ॥ ३३६ ॥

आरिको गोप्यको रात्रिजागरः सर्वदर्शकः ।
सेनापतिर्दण्डपालः कार्मिको मार्गरोधकः ॥ ३३७ ॥

दौवारिको वेत्रधरः क्षत्ता द्वास्थश्च दर्शकः ।
पुरोधास्तु पुरोगामी पुरोहितपुरोगमौ ॥ ३३८ ॥

वैतालिका बोधकरा वन्दिनः स्तुतिपाठकाः ।
मागधो मंखको घण्डाताडो धाण्डिकचाक्रिकौ ॥ ३३९ ॥

अरातिरहितश्शत्रुः दूषणः शात्रवः परः ।
मित्रं निजात्मीयजनौ वयस्येष्टहितप्रियाः ॥ ३४० ॥

गजोपचारकुशलो वाहिको मलहारकः ।
आधोरणो हस्तिपको हस्त्यारोहो निषादिनः ॥ ३४१ ॥

सत्प्रधाना महामात्रा हारोहागजवाजिनः ।
कुटुम्बी तु क्षेत्रजीवो वृद्धिजीवः कुलिन्दकः ॥ ३४२ ॥

वार्धुषिः स्याद्वार्धुषके प्रयोक्ता तूत्तमर्णके ।
द्रष्टरि व्यवहाराणां प्राड्विवाकोक्षदर्शकः ॥ ३४३ ॥

पलगण्डो लेपकारो लम्बनस्तूक्षपालकः ।
कायस्थः स्याल्लिपिकरः करणोक्षरजीवकः ॥ ३४४ ॥

लेखकोक्षरचञ्चुश्च चण्डिलः क्षुरमर्दकः ।
कुम्भकारः कुलालः स्याच्चक्री भार्गव इत्यपि ॥ ३४५ ॥

धूसरश्चाक्रिकश्च स्यादाभीरः शूद्रकोऽपि च ।
महाशूद्रस्तु गोपालो बल्लवो गोविदुर्विदुः ॥ ३४६ ॥

मालाकारो माल्यजीवी मालिकः प्रतिहारिकः ।
ग्रामाधीनो ग्रामतक्षः कोटतक्षो नदीतकः ॥ ३४७ ॥

जीवान्तको मांसकश्च क्रोटिको मांसविक्रयी ।
कैवर्तो धीवरो दाशनरेन्द्रो भुजगादने ॥ ३४८ ॥

स्त्री वधूटी वधू रामा मत्तकाशिनितम्बिनी ।
वरारोहा भोगवती कामिनी वामलोचना ॥ ३४९ ॥

भोगिनी वनिता कान्ता महिला युवतीति च ।
कृताभिषेका महिषी महादेव्यभिधा परा ॥ ३५० ॥

देवी राजकुलोत्था चेत्परिवारप्रपूजिता ।
वाकान्ता तु प्रियतमा स्वाधीना तु नृपात्मजा ॥ ३५१ ॥

पालागली यधजिता नृपस्योढाः प्रजा इमाः ।
अनूढा तु प्रिया राज्ञः कालज्ञा गणिका स्मृता ॥ ३५२ ॥

गणिका सा प्रगणिका या सप्तपरिवारिका ।
आर्या स्याद्राजगणिका या राजाज्ञापरिच्छदा ॥ ३५३ ॥

अधालगणिकाप्यज्ञा गणिका कुलसंभवा ।
राजभोगाय वेश्यात्वं गाता वैषधिकीति सा ॥ ३५४ ॥

बन्धकी तु गता वेशामवस्था यास्तु सत्कृतिः ।
शय्यास्रग्भूषणादौ तु नियुक्ता परिचारिका ॥ ३५५ ॥

प्रतिहारी तु राजानं संभावयति या सदा ।
अलिन्यन्तःपुरप्रेष्या साप्तभोगकुमारिका ॥ ३५६ ॥

इति नत्कीरविरचितायां बालप्रबोधिकायां षोडशोपदेशः ॥

निघण्टुश्च समाप्तः ॥

॥ वर्णदीपिका ॥

शिवमस्तु

सर्वमन्त्रस्वरूपेण स्वात्मारामेण योगिना ।
वर्णानां रूपसिध्यर्थं कथ्यते वर्णदीपिका ॥ १ ॥

कादयो व्यञ्जनाश्च स्यु स्पर्शास्ते मावसानिकाः ।
अथान्तस्था यरलवास्तूष्माणश्शषसास्सहाः ॥ २ ॥

विसर्गस्त्वभिनिष्कासः परे त्रिष्वनुनासिकः ।
उदात्तस्स्वरितश्चैव निहतस्त्वनुदात्तकः ॥ ३ ॥

नीचोऽनुदात्तो निहत उदात्तः स्वरितोऽपि च ।
अकारस्तु शिवो ब्रह्मा विष्णुश्च कमठोऽपि च ॥ ४ ॥

मृत्युञ्जयमहामन्त्रबीजं ब्रह्मा कुलोद्भवः ।
आकारस्तु घटे भारे परितापे पितामहे ॥ ५ ॥

आकर्षणमहामन्त्रबीजं पैशाचदेशजः ।
इकारः पणरत्नादिष्वग्रहोर्थगुणार्थयोः ॥ ६ ॥

हरे स्त्रीगजकुक्ष्यन्ते चन्द्रकान्ते स्मरेऽपि च ।
सिद्धौषधमहामन्त्रः कैलासगिरिसंभवः ॥ ७ ॥

ईकारोऽब्जदलो लक्ष्मीः पाणी कमलकेसरः ।
रचना मणिचापश्च बाणस्तु फणिजिह्विका ॥ ८ ॥

जगन्मोहनमन्त्रः स्यात् सितद्वीपभवः स्मृतः ।
उकारः क्षत्रिये नेत्रे विष्णौ देवगुरावपि ॥ ९ ॥

द्रव्यसिद्धिकरो मन्त्रो विष्णुबाहूद्भवो विदुः ।
ऊकारस्तु विद्भर्तस्मे राजपुत्रो महामुनिः ॥ १० ॥

उच्चाटनमहामन्त्रबीजं राजकुलोद्भवः ।
ऋकारः कुञ्जरे शैले द्विवेदे देवमातरि ॥ ११ ॥

सर्वमोहनमन्त्रः स्यादमर्त्यकुलसंभवः ।
ॠकारो रोमभेदे च दृष्ट्यां विगतसंपदि ॥ १२ ॥

सर्वाङ्गकवचो मन्त्रसमुद्रे सम्भवः स्मृतः ।
ऌकारो दन्तिदन्तश्च कुलीरः कपिवानरः ॥ १३ ॥

स्वर्गादित्यौ राक्षसश्च गात्रश्चापि निगद्यते ।
भयनिर्धूतमन्त्रश्च दैवराक्षससंभवः ॥ १४ ॥

ॡकारो नागमाता च गिरिर्वर्गं सुरोपि च ।
मनस्समाधिमन्त्रश्च व्योमादित्यभवो मतः ॥ १५ ॥

एकारस्तु महाशश्च तेजो रात्रिश्च सांख्यकः ।
विद्वेषणमहामन्त्रस्सूर्यतेजस्समुद्भवः ॥ १६ ॥

ऐकारो दिङ्मुखे हस्ते हले त्रिशिखरे त्वचि ।
उच्चाटनस्य मन्त्रस्य बीजं राजकुलोद्भवः ॥ १७ ॥

ओकारस्तु कुबेरः स्यात् पद्मनामनिधावपि ।
ब्रह्मानने ब्रह्मणि स्यान्मेधेऽपि च निगद्यते ॥ १८ ॥

गजवश्यकरो मन्त्रो विष्णोराननसंभवः ।
औकारो गणनाथश्च वक्त्रं कार्पासकोऽपि च ॥ १९ ॥

विशुद्धाङ्गस्सिन्दूरथो देवोऽपि च निगद्यते ।
कालमृत्युञ्जयो मन्त्रः प्लक्षद्वीपभवो विदुः ॥ २० ॥

अंशब्दः स्याच्चन्द्रस्थे वक्रवाक्येसिदीर्घके ।
अञ्जल्यां योगभेदे च परब्रह्मणि वस्तुनि ॥ २१ ॥

॥ पञ्चभाषाविलासम् ॥

By

(Shahaji Maharaj 1684—1711 A. D.)

—— * ——

सूत्रिरधारिवचनम् — (द्राविड) देशाधीश्वरनुडैय कन्निके कान्तिमदि राजसूययागत्तिले कृष्णनै पार्त्तु मोहिच्चु विरह वेदनैनाले सखियुडने श्रिंगारवनत्तुक्कु वरुकिरमार्गम् ॥

दरुवु — कन्निकै वाराळ् श्रिंगारमाक

किन्निमुले कुलुङ्ग श्रीकृष्णन् मेल् मोहं मिञ्जि
मदि मिञ्जिन वदनं वण्डै मिञ्जिन यळकम्
मदनध्वजं पोल् नयनं वडिवाक विळङ्ग ॥ १ ॥

मारन् सेय्युं वादैक्कु मनदिल् पोरुक्करियामल्
वारिजाक्षनै निनैत्तु वर श्रिंगारवनत्तुक्कु ॥ २ ॥

दरु — विन्दैयाय् वन्दाळ् कान्तिमदि

कोङ्गै रेण्डुं अलुङ्ग–इङ्गित मर्मोकं कोण्डु ॥ १ ॥

मिनिकि [1]कुलिकि कोण्डु–मीनाक्षि श्रिंगारवनत्तिल् ॥ २ ॥

मदिक्कुं तेन्रलुक्कुं मारनुक्कुं भयन्दु ॥ ३ ॥

सूत्रिरः — इन्दपडिकि कान्तिमदि वन्दु श्रिंगारवनत्तिले ओरु रम्यस्तलत्तिले यिरुन्दु विरहं अभिनयिकिर मार्गम् ॥

दरु — माने! यवनै नान् कण्डनाळ् मुदलुं मयल् पोरुक्कुदिल्लै
तेने! इदुक्कु उपायमे वळि तेरियादु
नानेन्न शेय्वे नेन्न शेय्वे नेन्न शेय्वेन् ॥ १ ॥

---

१ तुलिकि

अन्नमे ! मदि मुन्नुक्कुलुन्दवनिप्पो अतिशयमा यनलानान्
मिन्ने मुन्तेरिया तुळिन्द वादैये नानमुळिक्किरेनिप्पो नान् ॥ २ ॥

[1]नेत्तये तेंत्रल् नेत्तु वरैक्कु-मेत्ते सुकमा इरुन्ददु
इत्तनै दयविल्लामलेन्नै-मेत्तवे तावुरानेन्नै
अनङ्गनारो अरियेने एन्नै अवनै कडुंदु येयुरान्
दिनमोरु युगमाच्चु धैर्यमिल्लादे पोच्चु मनदिल् पकैयाच्चुदेनो ॥ ३ ॥

सू— इन्दपडिक्कि कान्तिमदि विरहातिशयत्तिनाले विरहं अभिनयिक्किर मार्गम् ।

दरु— एन्न शेयूवेनडि माने एन्नडि शेयूवेन्–एन्नशेयवेनडि माने ।
इन्नमुम् वरवु काणेने कनविलु(म्) मदनेयुराने कन्निये पोरुक्करियेने ॥ १ ॥

पात्रि तेत्रल् तावुदे पककार कुयिल् कूवुदे
आवि येन्नालडङ्गादे—अदिशयमाच्चुदे ॥ २ ॥

शन्दणम् शकिक्कादु माने—चन्दिरकान्तियिनाल् मेलिन्देने
सन्ततं कूडि यावाने सरसमाय् पोरुप्पाने ॥ ३ ॥

பஞ்ச பாஷா விலாசம்

By சாஹமஹாராஜா (1684—1711-A. D.)

சூத்திரதாரி வசனம்:—(திராவிட) தேசாதீசுவரனுடைய கன்னிகை காந்திமதி ராஜசூய யாகத்திலே கிருஷ்ணனைப் பார்த்து மோகிச்சு விரக வேதனை யினாலே சகியுடனே சிருங்கார வனத்துக்கு வருகிற மார்க்கம்.

தருவு—கன்னிகை வாராள் சிருங்காரமாக

கின்னிமுலை குலுங்க ஸ்ரீ கிருஷ்ணன்மேல் மோகம் மிஞ்சி
மதி மிஞ்சின வதனம் வண்டை மிஞ்சின யளகம்
மதன த்வஜம்போல் நயனம் வடிவாக விளங்க (1)

மாறன் செய்யும் வாதைக்கு மனதில் பொறுக்கறியாமல்
வாரிஜாக்ஷனை நினைத்து வர சிருங்கார வனத்துக்கு (2)

[1] तेत्तये

தருவு—விந்தையாய் வந்தாள் காந்திமதி

கொங்கை ரெண்டும் அலுங்க
இங்கித மமோகம் கொண்டு (1)

மினிக்கித் [1]குலிக்கிக் கொண்டு
மீனாக்ஷி சிருங்கார வனத்தில் (2)

மதிக்கும் தென்றலுக்கும் மாறனுக்கும் பயந்து (3)

சூத்திர :—இந்தபடிக்கி காந்திமதி வந்து சிருங்கார வனத்திலே ஒரு ரம்ய ஸ்தலத்திலேயிருந்து விரகம் அபிநயிக்கிர மார்கம்.

தருவு—மானே! யவனை நான் கண்டநாள் முதலும் மயல் பொறுக்குதில்லே

தேனே! இதுக்கு உபாயமே வழி தெரியாது
நானென்ன செய்வே னென்ன செய்வே னென்ன
செய்வே (ன்) (1)

அன்னமே மதி முன்னுக் குளுந்தவ நிப்போ
அதிசயமா யனலானான்
மின்னே முன்தெரியா துளிந்தவாதையே நான்
முழிக்கிறே நிப்போ நான் (2)

[2]நேத்யே தென்றல் நேத்துவரைக்கும் மெத்தெ சுகமா இருந்தது
இத்தனை தயவில்லாம லென்னை—மெத்தவே தாவுறானென்னை
அநங்கனாரோ அறியேனே என்னை அவனைக்கடந்து யேயுரான்
தினமொரு யுகமாச்சு தைரியமில்லாதே போச்சு மனதில்
பகையாச்சுதேனே (3)

சூத்திர :—இந்தபடிக்கி காந்திமதி விரகாதிசயத்தினாலே விரகம் அபிநயிக்கிற மார்கம்

தருவு—என்ன செய்வேனடி மானே என்னடி செய்வேன்—என்ன
செய்வேனடி மானே
இன்ன(மு)ம் வரவு காணேனே கனவிலு(ம்) மதனேயுரானே
கன்னியே பொறுக்கறியேனே 1

பாவி தென்றல் தாவுதே பககார குயில் கூவுதே
ஆவி யென்னாலடங்காதே—அதிசயமாச்சுதே 2

சந்தணம் சகிக்காது மானே—சந்திரகாந்தியினால் மெலிந்தேனே
சந்ததம் கூடி யாவானே ஸரஸமாய் பொறுப்பானே 3

---

1 துலிக்கி 2 நேத்யே

सूत — औरा ईविधंबुन ईरीति द्राविडदेशाधीश्वरुनि कन्यक कांतिमति वच्चिन यातदनंतरंबुन आंध्रदेशाधीश्वरुनि कन्यक कलानिधि राजसूययागंबुन कृष्णस्वामिनि जूचि मोहिंचि शृङ्गारवनबुन(कु)वच्चु समयंबुन तोलुत कटिकवाडु हेच्चरिक देलुप वच्चे मार्गंबु पराकु ॥

दरु — पद्मनाभमु वेट्टि बारिकोल केलबट्टि ।
दट्टिपैनि दुप्पटि घट्टिगा गट्टि ॥
जुट्टु निण्ड पूलुजुट्टि ।
मिट्ट पंड्लु येग बेट्टि ॥
अट्टहासमुतो विकटाङ्गुडु वच्चे ॥ १ ॥

सू — औरा ईविधबुन कटिकवाडु वच्चि हेच्चरिक देलिपिन यातदनंतरंबुन आंध्रदेशाधीश्वरुनि कन्यक कलानिधि शृङ्गारवनंबुनकु वच्चे मार्गंबु पराकु ॥

दरु — ओय्यारमुन वेडलेनु तीयविलुनु शरमन । तोय्य(लु)लंदरु गोलुव नेय्यमुन कलानिधि सन्ननि पय्यदलोन चिन्नि चन्नुलु चेलग पुन्नमचंद्रुरु सरिबोलु मोमु वेलुगग राजिल्लु रूपन वलराजु मोहमु जेंदग

दरु — गरिम मीरग वेडलेनु
अंदेलु घल्लुघल्लनि म्रोय—पादमुलंदु
अंदमुगनु जनुलंदरु जूडग
इंदुवदन चेलुवोंदेडि नडल

सू — औरा ईविधम्बुन याकलानिधि शृङ्गारवनम्बुनकु वच्चि योक रम्यप्रदेशंबुन सुखासीनुरालै याकृष्णस्वामियोक्क रूपरेखाविलासादुलु मदिनि देलिसि विरहपरतंत्रियै विरहम्बभिनयिंचे मार्गमु ।

दरु — इन्तिरो वानि पोंदु एन्नडु गलुगुनम्म—मुद्दुगुम्म
विंतग वानि मोवि विंदुसेयुटेन्नडे—मुद्दुगुम्म
कलकंठि वानि बिगिय कौगिलिंचुटेन्नडे—मुद्दुगुम्म
वलराजुकेळिनि वानि गूडुटेप्पुडे—मुद्दुगुम्म ॥

सू — औरा ईविधम्बुन मरियु विरहम्बभिनयिंचे मार्गंबु ॥

बालरो विनवे बालरो
बालरो वानिकि नेनेल मरुलैतिने
बाळिमीरे मरुनि बारिकि ताळलेने
चिलुकल रवळिकि चीकाकयिति चाल
अह्लल नादमुलकु कलगिति नेनय्यो
पोंदुगा वीडु दयनु पूविल्तुकेळिनन्नु
पोंदनियंदमु पोलति तनकेल

सू — आ कलानिधि मरिन्नि विरहंबभिनयिंचे मार्गंबु ॥

दरु — तालजालने चेलियरो–यॅतनि नेदेलुपुदु चेलियरो
बाळि मीरेने चेलियरो–मरुबारिकोर्वलेनु चेंलियरो
वेन्नेल कांकलचे चेलियरो–नेविरहमुजेंदिति चेलियरो
मिन्नगु गालिचे चेलियरो–ने मिगुल नलसिति चेलियरो

सू — ओरा ईविधंबुन विरहंबभिनयिंचे कलानिधिनि चूचि वद्दनुंडे चेलिकत्ते पलिकें मार्गंबु पराकु ॥

द्विपद — विनवम्म नीवु नाविन्नपं बोकटि
घनविरहंबुचे कलग नेमिटिकि?
शृङ्गारवनमुन शीतलपवनु
डंगनामणि चन्द्रु डब्जाकरमुन
तानु सहायमै दनरुचु नुंड
चानरो नीकु विचारंबु नेल

सूत्र — औरा ईविधम्बुन बलिकिन मुग्ध चेलि वाक्यंबुलु विनि कलानिधि पलिके मार्गंबु पराकु ।

दरु — इन्ति(रो)! पड्चुबुद्दिकि नेनेमि सेतुनम्म
इन्तिरो! यावग नितैना देलियदु
दण्डदन विरहतापमु ताळनेनंटे
पण्डु वेन्नेललो रम्मनि मेंडोडिडने-ओशम्म! ॥

पूवुबोणि यिनैना पोद्दु बोले दंटेनु
पूवुदोटलो रम्मनि पोरु बेट्टने—ओशम्म! ॥

मंदयान नामेनु मसलुचुन्नदंटेनु
गंधमु बूसुकोम्मनि गासिसेसे—ओशम्म! ॥

ओंटि नुंडलेनु विभुडिटिकि रालेदंटेनु
ओंटेलनीकु तोडु उन्नानने-ओशम्म!

सूत्र — औराईविधंबुन ॥ येणेरीति आंध्रदेशाधीश्वराचि कन्या कलानिधि आल्यानंतर तदनंतर कथा ऐसिजे । महाराष्ट्र देशाधीश्वराचि कन्या कोकिलवाणी राजसूय यागामध्यें कृष्णास पाहून शृंगार वनास येतें मणून, सकल जनास सावध करावयास कंचुकिराय विनोदि येतो पहा ॥

दरु — पट्टनामधरी अट्टहासकरी ।
काठीघेवुनिकरीं कंचुक्यालासभांतरीं ॥

विकट बहुतकरी विष्णुध्यानकरी ।
सकलांस दूरकरी संतोषानें उड्यामारी ॥

सूत्र — येणेरीति कंचुकी येउन सभास्तांस सावध केल्यानंतर कोकिलवाणी शृंगार वनास येतेपहा ॥

दरु — कंदलित यानंदकूनें मंदमंद वंदितासे ।
सकल सखीजन वारबृंदें ॥ १ ॥

सकल शृंगार करून सादर सारसनयने ।। येतसे ।।
अकलंक सौंदर्यरूपें अखिलमान्ये ।। २ ।।

चंदन कर्पूर कस्तूरि चर्चून उटीघेऊन
इंदुवदन मंदहासमुख यल्हाल वीटी ।। ३ ।।

दरुः — राजहंसगमनाते राजीव पत्रनेत्रीते ।
राजमुखि शोभताते–रामामणीते ।। १ ।।

कलकंठी मृदुवचनी कस्तूरितिलक धरूनी ।
अलिकुल नीलवेणी-अंबुजपाणी ।। २ ।।

जरीचोली साडी नेसुनि जवें बाजूबंदलेउनि ।
वर कन्यकामणि वंदनी येजनि ।। ३ ।।

सादर शृंगारवनी सकल सौंन्दर्यखाणी ।
मोद अलिकरि राजगमनि मोरवानी ।। ४ ।।

सूत्र — येणेंरीति महाराष्ट्र देशाधीश्वर कन्या कोकिलवाणी शृंगारवनास येऊन रम्यप्रदेशीं बैसून विरह अभिनयिते पहा ।।

दरु — मन माझें मोहसागरीं ।। मग्न जालें ये अवसरी ।
वनीकोण उद्धरी । वरनाथ विना मज ।। १ ।।

कामबाण पीडाकरी ।। कायकरूमी विचारी ।
सोमकिरणतपकरी सोसूं किती वारंवारीं ।। २ ।।

गरल मिश्रित आला गर्वित होउनि मलयानिल
सरसघिल येक ब्यालु । समिधाग्निहून अधिकझाला ।।

सू— एणेंरीति कोकिलवाणी मागती विरह अभिनयिते पहा ॥

दरुवु— जन्म व्यर्थ याचे सांगा वाचून ।
करिकुंभाचे गर्वहारी कनककलशापरी ॥
सरसयेउन दोहीकरीं । सादरस्तन धरितारीं ॥ १ ॥

आमूल्य माणिक्य आरक्तसारें ।
अमृताहून मधुरकोमलधरी
दंतवारी गोडीनें क्षतनकरीतरी ॥ २ ॥

सुंदर कनकालतिकाहून शोभें ।
देहतडितसमानें यिदुधरहें[1]
सौंदर्य इछून-यथेष्ठरमेनतरी ॥ ३ ॥

सू— अइसे महाराष्ट्रदेशाधीश कन्या कोकिलवाणी आइ। बहारे उत्तरदेशाधीश कन्या सरससिखामणि श्रिंगारबनकूं आवति कहकर श्रिंगारबनबीचलोक दूरकरबेकूं द्वारपाल आवेदेखो ॥

दरुवु— लटकत आवे द्वारपाल देखो ।
शिरबांध चिरनीको जामपहर देखो ॥
तिलकमाथे धाके सबजन दूरकर ॥ १ ॥

लाटी हातधर द्वारपालक आवे देखो ।
बांधकर हांसत खेलत आवेनीको ॥ २ ॥

द्वारपालवचन-अरे! सुनो हमार नांम द्वारपाल । शार्दूल उत्तरदेशाधीश कन्या आवते कहकर श्रिंगारबनबीचलोक दूरकरबेकू हं आये ॥

---

1 देहतटित ।

श्रीः

पुस्तकविमर्शः

वैखानसविजयः । श्रीवेङ्कटेशकुलदैवत-तर्कार्णव-अभिनवदेशिकाद्युपाख्याविख्यात मान्य-भारतसम्राट्संमानित श्रीवात्स्यचक्रवर्ति **वीरराघवाचार्य**विरचितः आचार्यदीपप्रकाशकाविरुदा-लंकृतैः "कल्याणं अय्यंगार्" इति सुप्रसिद्धैः श्री उ. वे. पि. बि. श्रीनिवासराघवाचार्यैः प्रकाशितः ॥ ५० पुटात्मकः मूल्यम् ....? प्रकाशक महाशयेभ्यः प्राप्तुं शक्यः ॥

इमं ग्रन्थं प्राप्य महान्तमानन्दमविन्दामहि । कृत्स्नभारतप्रसृमरकीर्तीनां प्रातः-स्मरणीयानां अधीताध्यापितसकलशास्त्राणां अनन्यसाधारणसरस्वतीनिष्यन्दपात्रीभूतानां एतत्प्रबन्ध-प्रणेतॄणां सुगृहीतनामधेयानां तत्रभवतां सहजसिद्धां नवनवोल्लेखवैचक्षण्यमत्रानुभूय नितरां प्रहृष्यामः । अत्रत्यानां गुणानामनन्तत्वात् सामस्त्येन तदुल्लेखनाशक्त्या च सहृदयहृदयमेव तत्र प्रमाणीकृत्य, मतिदौर्बल्यप्रयुक्तान् कतिचन विशयान् परं लिखामः ॥

(१) वैखानसविजयाभिधे ग्रन्थेऽस्मिन् ग्रन्थकर्तुस्सर्वतोमुखनिरङ्कुशनिरतिशयज्ञान-भूम्ना बहूनि प्रमाणवचनान्युपात्तानि । तेषामाकरोऽपि यदि सहैव दर्शितस्स्यात् वाचकाः अधिकतर-मनुगृहीतास्स्युः ॥

(२) "वैखानसविजयः" इति नामकरणं प्रतिपक्षसापेक्षं भवति । न केचिद्वैखान-सानां प्रतिपक्षतया ग्रन्थेऽस्मिन्नुपन्यस्ताः, न वा तेषां विजयः । "वैखानसाभ्युदयः" इति नामकरणमुपपन्नतरं स्यात् ॥

(३) वैखानसश्रैष्ठ्यप्रतिपादनपरेऽस्मिन् ग्रन्थे अधिकतरो भागः पाञ्चरात्रविषयकः प्रदृश्यते । ग्रन्थकर्तुः पाञ्चरात्रानुयायित्वमेव तत्र निदानम् । तावता विस्तरेण पाञ्चरात्रिकविषय-विवेचनं वैखानसश्रैष्ठ्यस्य उपयुक्तं आवश्यकञ्च भवति वेति विवेचनीयम् ॥

(४) यथा बौधायनाः, यथा वा आपस्तम्बीयाः, एवमेव वैखानसा अपि स्वगृह्योक्त-प्रकारेण क्रियाः कुर्वन्त आसते । देवालये वा गृहे वा विष्णोरर्चनं तेषां स्वगृह्योक्तम् । तदेव ते कुर्वन्ति । सेऽयं पूजापद्धतिः सूत्रान्तरनिष्ठैः परिग्रहीतुमशक्या, तेषामवैखानसत्वादेव । आहिताग्नि दीक्षितं अनाहिताग्नयोऽन्ये, काम्यफलविशेषलिप्सया तत्साधनं कर्मानुष्ठापयन्तः यथा स्वाभीष्टं लभन्ते; तद्वत् वैखानसैरर्च्यमाने भगवति, देवालयनिर्माणनानाविधोत्सवप्रवर्तनादिपूर्वकमर्चनादिकं ताने-

वानुष्ठापयन्तोऽन्ये स्वस्वाभीष्टं लभन्ते । "वैखानसेन च पथा **नियताधिकाराः**" इति वदन्तो निगमान्तगुरवः स्पष्टतरमिमं विषयं प्रत्यपीपदन् । इत्थं वस्तुतत्त्वे सुनिश्चिते, "वैखानसमार्गः सूत्रान्तर-निष्ठैः कुतो न परिगृहीतः?" इति चोद्यं [1] "उपदेशकदौर्लभ्याद्वा कारणान्तराद्वा" [2] "तत्रैषां प्रवेशभिया च वैखानसैः स्वमार्गः परेभ्योऽनुपदिष्ट आसीत्" इत्याद्युत्तरञ्च अप्राप्तावसरं विरसञ्च । न केवलमेतावदेव, किन्तु वैखानसानां निकर्षपर्यवसाय्यपि भवति ॥

(५) तप्तचक्राङ्कनं शरणागतिञ्चाधिकृत्य ग्रन्थेऽस्मिन्विचारः कृतोऽस्ति । चिराय विवादो-ऽनयोरनुवर्तमानोऽस्ति । वैखानसविजयग्रन्थकर्तृभिः अत्रावश्यवक्तव्यमुपेक्षितमिव । वैष्णवेतरेषु तप्त-चक्राङ्कनस्य प्रचार एव नास्ति । उपनयनमात्रादेव ते तृप्यन्ति । वैष्णवास्तु तप्तचक्राङ्कनसंस्कारविधुरं उपनयनादिभिः संस्कारैः संस्कृतमपि भगवदाराधनभोज्यवस्तुस्पर्शनादावनधिकृतं मन्यन्ते । वैखान-सास्तु वैष्णवा एव सन्तः विष्णुबल्याख्यसंस्कारसंस्कृतक्षेत्रोत्पन्नत्वमात्रेण स्वेषां अष्टाक्षरादि-सर्वमन्त्रोपदेशयोग्यतां भगवदाराधनार्हत्वञ्चाभिमन्यन्ते । तत्सूत्रे तावत एव कथनात् । तप्तचक्राद्यनङ्किता अपि वैखानसाः देवालयेषु पूजां कुर्वन्ति । तदनुमन्यमानाः सूत्रान्तरनिष्ठाः वैदिकोत्तमाः विद्वांसः सत्कर्मानुष्ठाननिरताश्च भगवत्सन्निधौ तेषां हस्तात् तीर्थप्रसादादिकं गृह्णन्त उपयुञ्जानाश्च दृश्यन्ते । भगवत्सान्निध्यविरहे तु (साधारणदेशकालादिषु) तप्तचक्राद्यङ्किता अपि वैखानसाः शिष्टैः सूत्रान्तर-निष्ठैर्नैव परिगृह्यन्ते । अत्र हेतुर्वक्तव्यः । तथा तप्तचक्राद्यङ्कितान् वैखानसान् अनङ्किता वैखानसा न परिगृह्णन्ति । एवमादिभिरनियतैस्समुदाचारैः श्राद्धादिषु भूयान् क्लेशोऽनुभूयते वैखानसैः । यदि वैखानसा वैदिकाः! वैदिकतराः!! वैदिकतमाश्च!!! कुतोऽन्य इव तेऽपि सर्वत्र सर्वैः निर्विशङ्कं न परिगृह्यन्ते? यदि वैखानसैः क्रियमाणः सूत्रान्तरनिष्ठबहिष्कारः इत्थं प्रतिफलतीत्युच्यते नैतदुप-पत्तिमत् । स्वसूत्रोपदिष्टमार्गे वर्तमानास्ते न वचनीया नाम भवन्ति । इतरेषान्तु तथाविधनिर्बन्ध-रहितानां एकान्ततः अथवा अंशतः तदपरिग्रहः कथं युज्यते? "वैखानसेन च पथा **नियताधि-काराः**" इति वदन्तो निगमान्तगुरवोऽपि तप्तचक्राद्यनङ्कितानामेव भगवदर्चनाधिकारं वैखानस-विषये अनुमन्वत इव । "नियताधिकाराः" इति पदस्य अर्थपरिपोषः एवमेव संपद्यते ।

एवं प्रपदनविषयेऽपि विवेचनं कर्तव्यम् । "भक्त्यादौ शक्त्यभावः ..." इत्यादिरीत्या मोक्षसाधनतया उपदिष्टे उपासनेऽनाधिकृताः मोक्षार्थिनः शरणागतावधिक्रियन्ते । वैखानसास्तु स्वगृह्योक्तप्रकारेण विष्ण्वर्चनमेव मोक्षसाधनं मन्यन्ते । अतः प्रपदनमार्गो न तैराद्रियते ।

---

१ वैखानसविजये–पुट–१७, पंक्तिः ८.

२ ,, ,, २०, ,, २.

"अथाग्नौ नित्यहोमान्ते विष्णोर्नित्यार्चा सर्वदेवार्चनं भवति ... तस्माद्गृहे परमं विष्णुं प्रतिष्ठाप्य सायं प्रातर्होमान्तेऽर्चयति ... षडङ्गुलादहीनं ..." (वैखानसगृह्यसूत्रं-४-१२)

"अथ नित्यार्चनं ... यज्ञपुरुषं ध्यायन् पुरुषसूक्तेन प्रणामं कुर्यात् यद्यज्ञेषु विहीनं तत्संपूर्णं भवतीति श्रुतिः। द्विजातिरतन्द्रितो नित्यं गृहे देवायतने वा भक्त्या भगवन्तं नारायण-मर्चयेत्। तद्विष्णोः परमं पदं गच्छतीति विज्ञायते" (वै. गृ. सू. ४-१२)

"नारायणमर्चयेत् तद्विष्णोः सालोक्यादिपदावाप्तिर्भवतीति नारायणं परं ब्रह्म ... परं पुरुषमर्चयेत्" (मरीचिसंहिता प्रथमः पटलः) "तस्माद्विष्णवर्चनमेव कर्तव्यमिति विज्ञायते अथ समाराधनं चतुर्विधं भवति जपो हुतमर्चना ध्यानमिति ... एतेष्वर्चनं सर्वार्थसाधनं स्यात्" "एवं पञ्चमूर्तिनामभिर्गुरूपदेशसंयुक्तोऽष्टाङ्गयोगमार्गेण ध्यात्वाऽऽवाह्यार्चयेदित्याह मरीचिः" (मरीचिसंहिता पटलः-७०)

इत्यादिवचनानि ते तत्र प्रमाणयन्ति। वेदार्थनिर्णये जैमिनिव्यासादिभ्योऽन्यूनः वैखानससूत्रकारः ध्यानप्राधान्यबोधिकाः श्रुतीः (जानन्नपि) परित्यज्य अर्चनप्राधान्यप्रतिपादिकां "प्रवः पान्तं" इत्यृचं सादरं प्रथमतः परिगृह्णाति, अर्चनादेव मोक्षः इति तत्त्वमुद्घाटयितुम्। न खलु स्वशिष्येभ्यः अयथार्थमुपदेक्ष्यति भगवान् सूत्रकारः?

वैखानसविजये तु सर्वमिदं न स्पष्टीकृतम् "**तप्तचक्राङ्कनाभावे विष्णवर्चन वैगुण्यं भवतीत्यस्याभावेऽपि** तद्विष्णुचिह्नं विष्णुभक्तैरुपेक्षितुं न युज्यते। अत एव ..." इत्येवं तप्तेनातप्तेन वा चक्रादिना यथायोगमङ्कनस्यावश्यकत्वे सर्वत्र विदिते पूजकशरीरस्यानङ्कनं हि न युज्यते" (वैखानसविजये पुटे २२-२३) इति पक्षद्वयोपन्यासपूर्वकं अचेतनयागोपकरण-पात्रादितुल्यं चक्राङ्कनं वैखानसैः कर्तव्यमेवेति स्वाभिप्रायावेदनरूपं प्रतिपाद्यतेऽस्मिन् ग्रन्थे॥

तथा विष्णवर्चनविषयेऽपि "भक्त्या भगवन्तं नारायणमर्चयेत्" "तद्विष्णोः परमं पदं गच्छति" इति भक्तेरङ्गत्वं अर्चनस्य प्राधान्यञ्चोच्यत इत्यप्याहुः" (वैखानसविजये पुटं-१७) इति प्रतिपाद्यते। अत्र "आहुः" इति वदन्तो ग्रन्थकाराः, "वैखानसानामिदं मतं न मम" इति सूचयन्ति वा? "पञ्चस्वेतेषु पक्षेषु कश्चिदेकः प्रमाणवान्" इतिवत् उपासनतुल्यमर्चनस्यापि साक्षान्मोक्षसाधनत्वं स्वयमप्यङ्गीकुर्वन्ति वा? इति निर्णेतुं न शक्यते॥

न चेह निर्णयः कर्तुं न शक्यते मीमांसकपरिबृढैर्वैखानसविजयग्रन्थकृद्भिः। "तमेव

विदित्वा" इत्यादिश्रुतिसिद्धं उपासनस्य मोक्षसाधनत्वम् । विरोधाधिकरणन्यायेन वैखानस-स्मृत्युक्तार्चनस्य साक्षान्मोक्षसाधनत्वन्तु न प्रसरं लभते। तुल्यबलविरोधे हि विकल्पः! अतोऽर्चनस्य मोक्षसाधनत्वोक्तिः ध्यानद्वारैव, नतु साक्षात् । तदप्यर्चनं वैखानससूत्रकारप्रोक्तं अनन्यप्रयोजनतया स्वधर्मबुद्ध्या संध्यावन्दनादितुल्यं क्रियमाणमेव तथा। पणपूर्वकद्रव्यग्रहणार्थं क्रियमाणन्तु विष्ण्वर्चनं तथाविधमहिमविधुरं सत् न मोक्षमार्गोपयोगि भवेदिति स्वान्तर्हृदये अनाश्वासवन्तः वैखानसाः प्रपत्तिमार्गं प्रविशन्ति, अतथाभूतास्तु न। एवमेव तप्तचक्राङ्कनमपि तेषामेव स्वेच्छया निर्णेतव्यमुत्सृष्टं प्रामाणिकैः, यथा तेषामेव तेन्कलैवडकलैपुण्ड्रधारणविषये ॥

एवं द्वित्रेषु विषयेषु वैखानसविजयग्रन्थः समुचितं निर्णयं न प्रदर्शयतीति तात्पर्यं द्वयोर्वैखानसविदुषोर्हृदयेऽपि लब्धप्रसरम्। विजयग्रन्थानुमोदने कृतज्ञतानिवेदने च पठ्यमाने इदं ज्ञायेत । ज्ञानसागरैर्विजयग्रन्थकृद्भिः अवसरान्तरे एवंविधा अपि विषयाः सुव्यक्तमुपपाद्येरन्निति प्रतीक्षामहे, एतल्लेखनसंजातोऽपराधोऽपि कृपया क्षन्तव्य इति साञ्जलिबन्धं प्रार्थयामहे च ॥

सरस्वतीमहाल्, तंजावूरु.
6—7—65

इति विद्वज्जनविधेयः
नावल्पाक्कं देवनाथाचार्यः ।

FROM OUR VISITOR'S BOOK.

1. It has been difficult to visit the library and its priceless collections of manuscript material and have no time to properly obtain some view of individual items. I can only hope to recommend other students to plan their tour to allow adequate acquaintance with this notable units. All thanks to the chief librarian and his staff for their courtesy.

JOHN K. MILLS,
American Institute of Poona,
Indian Studies. November 21, 1964.

2. We enjoyed very much the collection of palm-leaf manuscripts, the miniature illustrated painting of the Ramayana, and the documents on anatomy of animals. We would like to suggest that you make colour reproductions (on post-cards or photographs) of the painting of the Ramayana.

JOSEPHINE R. PARIKH,
Chicago, Ill. U. S A., December 5th 1964.

3. A treasure collected by a benefactor of Indian culture and preserved by those who have come after him. I hope every effort will be made to preserve it for those who will belong to the future generations. The whole thing is worth a visit by every Indian if not also by all who visit India from abroad.

JEEVAN LAL KAPUR,
Chairman Delimitation Commission of India,
New Delhi. 18-12-64.

4. T. M. S. S. M. Library is one of the rare libraries preserving ancient documents and is serving as a source for research by scholars of various types. The palm leaf documents in Marathi and Oriya scripts were found interestingly displayed. I wish more use is made of this library.

J. NOTA,
Crop Production Specialist,
Director of Extension, New Delhi. 19-12-64.

5. I had the opportunity of visiting the library to-day and was very happy to go round and see the old collection of manuscripts on palm leaves. I was surprised to see that the manuscripts of 500 and more years look quite fresh and clear. The books and manuscripts are very well preserved and the staff are very courteous and polite to the visitors. I wish the library every success. I am glad to learn that the Union Government have given a grant for doing research in Ayurveda.

J. JAYARAMAN RAO,
Inspector General of Registration and Stamps,
Andhra Pradesh, HYDERABAD. 26-12-64.

6. It is a great joy to visit the library & museum containing so many old treasures. I congratulate those working here and find the valuable work they are doing.

SUSEDA KRIPALANI,
Chief Minister, Uttar Pradesh 23-1-65.

7. It is great pleasure to visit Saraswathi Mahal which can be rightly called "Treasure house of Paintings and Arts of immense value".

SYED AEZIS,
Secretary, T. N. C. C.

8. We have seen here a very rich collection of old books and manuscripts and have been deeply impressed by the excellent work that is being done by the devoted people attached to the institution. We wish the institution all success in its effort in popularising other old literature.

BHABUNATH DATTA,
Member Finance Commission, Govt., of India.
and Mrs. DATTA. 11th March 1965.

9. We were pleasantly surprised by the wealth of rare manuscripts and books in your library. I hope that you can make the materials available to all thousand.

WILLART W. COCHROW,
March 27, 1965.

10. I was very greatly impressed by the wealth of ancient relics and manuscripts collected and preserved in the Maharaja Serfoji's Saraswati Mahal and there so, by the devotion and earnestness of the workers of this institution to make these available to the historians and scientists in the country and outside for further research and study. I have no doubt that Government of India and Government of Madras appreciate this laudable institution and they will give it all assistance and encouragement.

DIRECTOR OF PROCUREMENT,
Government of India. 27-3-65.

11. This surely is a treasury of old manuscripts preserved on a very unusual material. It is to be hoped that they can be but on microfilm for wider not only in India but over the rest of the world.

PITHEN J. THORECPTRRA U. S. A.
27-3-65.

12. The visit this afternoon was rewarding and I was well impressed by what I saw.

A. BAKSI,
New Delhi. 27-3-65.

13. While on a visit to the South I took the opportunity to visit Saraswathi Mahal and was impressed with the amount of literature in Modi script which the library possesses. If properly studied and catagorised, the literature could yield a lot of information on the Ayurvedic practices, religious forms etc, prevalent during the last 300 years or so in this part and the effort would prove worth the time and money. I do hope the work will receive financial assistance both from official and non-official quarters.

G. KILLARLAY,
Bombay - 17.

14. Even a cursory look at the treasure-house of knowledge and lore is enough to convince any one that it is not only something unique but, perhaps, pearless. It is a great pity that it is so little known in other parts of India. Taking interest in its development would be

only serving the national say, human — interest. I wish I could do something in this direction. It will be a privilege if I am able to do anything at all.

PREM BHESIN,
18, Windson Place, New Delhi.
4-5-65.

15. தஞ்சையரசர் சரபோசி மன்னர் நூல் நிலையத்தைக் கண்டு மகிழ்ந்தேன். சென்னை மாநில அரசும், இந்திய அரசும் இந்நூல் வளர்ச்சிக்கு மேன்மேலும் ஆவன செய்துதவுதல் வேண்டும் என்பது என் விருப்பம்.

க. வெள்ளைவாரணன்,
தமிழ் ஆராய்ச்சித் துறை,
அண்ணாமலைப் பல்கலைக் கழகம்,
16—4—'65.

It is indeed tantalising to be able to spend only a brief while in this house of treasures and to have only a fleeting glimpse of manuscripts which invite hours and even days of leisurely examination. Even so, this visit has been a rewarding and an enriching experience. I sincerely hope it will soon be possible to provide better care for these priceless manuscripts and to arrange for them to be micrographed.

INDIRA GANDHI,
22—6—65.

Two copies of each book have to be sent for review in the Journal. Articles published in this Journal can be reproduced with the permission of the Editor. All communications regarding the Journal may be addressed to :—

THE EDITOR,
The Journal of the
Tanjore Maharaja Serfoji's
Sarasvati Mahal Library,
T. M. S. S. M. Library
THANJAVUR.
(Madras State) India.